# ॥ શ્રીરમણ પરવિદ્યોપનિષત્ ॥

.. Shri Ramanaparavidyopanishad ..

sanskritdocuments.org

August 2, 2016

# .. Shri Ramanaparavidyopanishad ..

# ॥ શ્રીરમણ પરવિદ્યોપનિષત્ ॥

## Document Information

Text title : Shri Ramana Paravidya Upanishad
File name : ramaNaparavidyopanishad.itx
Category : upaniShat
Location : doc_deities_misc
Author : 'WHO' (K. Lakshmana Sarma)
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Sunder Hattangadi sunderh at hotmail.com
Proofread by : Sunder Hattangadi sunderh at hotmail.com
Source : Ramanashrama Publication ISBN 81-8288-058-0 2nd ed. 2009
Acknowledge-Permission: Sri V.S. Ramanan, President, Sri Ramanasramam sriramanamaharshi.org
Latest update : Dec. 14, 2014
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ શ્રીરમણ પરવિદ્યોપનિષત્ ॥

શ્રીલક્ષ્મણશર્મણા વિરચિતા

મઙ્ગલં
અહંસ્વરૂપેણ સમસ્તજન્તો-
 ર્વિભાન્તમન્તર્વિભુમપ્રમેયમ્ ।
ગુરું ગુરૂણામજમાદિદેવં
 વન્દામહે શ્રીરમણં દયાબ્ધિમ્ ॥

ઈશ્વરો ગુરુરાત્મેતિ મૂર્તિભેદવિભાગિને ।
 વ્યોમવદ્વ્યાપ્તદેહાય દક્ષિણામૂર્તયે નમઃ ॥ ૧॥

માણ્ડૂક્યમુખ્યોપનિષત્સુ દિષ્ટા
 જ્ઞાનાભિધા યા સહજાત્મનિષ્ઠા ।
સસાધના તેન નિજાનુભૂત્યા
 સન્દર્શિતા સા પ્રતિપાદ્યતેઽત્ર ॥ ૨॥

સમીક્ષ્ય સાંસારિકજીવનસ્ય
 દુઃખાત્મતાં કામભયાશ્રયત્વાત્ ।
દ્વાભ્યાં વિમુક્તં ગુરુમેત્ય બુદ્ધં
 વિમુક્તિમાર્ગં પ્રણિપત્ય પૃચ્છેત્ ॥ ૩ ॥

બ્રૂયાત્ સ બુદ્ધઃ પરમં રહસ્યં
 સમસ્તબુદ્ધાનુભવપ્રસિદ્ધમ્ ।
જાનાસિ ચેત્ સ્વં ન તવાસ્તિ દુઃખં
 દુઃખી ભવેસ્ત્વં યદિ વેત્સિ ન સ્વમ્ ॥ ૪॥

યતઃ સુષુપ્તૌ ન તવાસ્તિ દુઃખં
 ત્વયીદમારોપિતમેવ નાન્યત્ ।
જિજ્ઞાસયા સ્વં સમવેત્ય સત્યં
 નિજસ્વરૂપે સુખરૂપ આસ્સ્વ ॥ ૫॥

અર્થોઽયમેવં ગુરુણોપદિષ્ટઃ
 સારઃ સમસ્તશ્રુતિશીર્ષવાચામ્ ।
અસ્યોપદેશસ્ય હિ વિસ્તરેણ
 વ્યાખ્યૈવ સર્વા નિગમાન્તવાણી ॥ ૬॥

જ્ઞાનસ્વરૂપં નિજસત્યમેકં
 સ્વયમ્પ્રકાશં હૃદિ સત્યમસ્તિ ।

સંશાન્તચિત્તેન હૃદિસ્થિતિર્યા
   સા તસ્ય બોધોઽપિ વિમુક્તિભાવઃ ॥ ૭॥

આત્મસ્વરૂપા હૃદિ ભાસમાના
   સદૈકરૂપા વિમલા ચિતિશ્ચ ।
બ્રહ્માભિધાનં જગતોઽખિલસ્યા-
   પ્યાધારસત્યં દ્વયમેકમેવ ॥ ૮॥

આધારસત્યે વિમલે તુ તસ્મિન્
   નિજસ્વરૂપે મનસોપક્લૃપ્તમ્ ।
અવિદ્યયા વિશ્વમમું નિમીલ્ય
   ભાતિ સ્વયં સત્યવદજ્ઞતાયામ્ ॥ ૯॥

નિમીલ્ય રજ્જું ભુજગઃ સ્વયં સન્
   મન્દાન્ધકારે સતિ ભાતિ યદ્વત્ ।
આત્માનમેવં ભુવનં નિમીલ્ય
   ભાતિ સ્વયં સત્યવદજ્ઞતાયામ્ ॥ ૧૦॥

અવિદ્યયાઽઽત્મા વપુષા મિતશ્ચ
   સુખી ચ દુઃખી ભવપાશબદ્ધઃ ।
પ્રતીયતેઽજ્ઞોઽપિ પૃથક્ પરસ્મા-
   દાત્મા તુ સાક્ષાત્પર એવ નાન્યઃ ॥ ૧૧॥

સંસારિતા સ્વસ્ય તતો મૃષૈવ
   બુધ્યેત તન્નિર્મનને પદે તુ ।
“નહ્યસ્ત્યવિદ્યા મનસોઽતિરિક્તા
   મનોહ્યવિદ્યા ભવબન્ધરૂપા” ॥ ૧૨॥

વીક્ષ્યાહિમીક્ષેત યથા ન રજ્જું
   વિશ્વં સજીવેશ્વરમાત્મરૂપે ।
અવિદ્યયાઽઽરોપિતમીક્ષમાણો
   ન વીક્ષતે સ્વં પરમાર્થસત્યમ્ ॥ ૧૩॥

નિમીલતઃ સ્વો ભવિતૈવ તાવ-
   દ્યાવત્ સ્વતઃ સત્યમિદં વિભાતિ ।
તથા ન ભાયાન્મનસિ પ્રણષ્ટે
   નાશાય તસ્માન્મનસો યતેત ॥ ૧૪॥

નિમીલિતં સ્વં મનસા તમેનં
   મિથ્યાપ્રપઞ્ચપ્રવિકલ્પનેન ।

સ્વાન્વેષણેનાત્મનિ નિષ્ઠિતઃ
  સન્નુન્મીલ્ય તસ્મિન્પ્રવિલાપયેદ્યઃ ॥ ૧૫॥

મનોઽપ્યવિદ્યામખિલં પ્રપઞ્ચં
  તેનાનુભૂયેત નિજં સ્વરૂપમ્ ।
સંસારહીનં નિરુપાધિકં ચ
  બ્રહ્માત્મકં કેવલમદ્વિતીયમ્ ॥ ૧૬॥

ભીત્યાઽથવા જન્મમૃતિપ્રવાહાત્
  પ્રપદ્યતે ચેચ્છરણં મહેશમ્ ।
નશ્યેદવિદ્યા કૃપયૈવ તસ્ય
  તદા સ્થિતઃ સ્યાન્નિજસત્યભાવે ॥ ૧૭॥

ભક્ત્યા પરસ્મૈ સ્વનિવેદનં યત્
  પ્રપત્તિમેતાં નિગદન્તિ સન્તઃ ।
તદ્ભક્તિરીશે નવધોપદિષ્ટા
  કાર્યામુમુક્ષોઃ શ્રવણાદિરૂપા ॥ ૧૮॥

Quote - Srimad Bhagavatam
  શ્રવણં કીર્તનં વિષ્ણોઃ સ્મરણં પાદસેવનમ્ ।
  અર્ચનં વન્દનં દાસ્યં સખ્યમાત્મનિવેદનમ્ ॥

નિષ્ઠાચલા સા નિજસત્યભાવે
  જ્ઞાનં વિમુક્તિઃ સહજા સ્થિતિશ્ચ ।
સ્થિતોઽચલસ્તત્ર પદે પરસ્મિન્
  નિરસ્તમોહો ભવતિ પ્રબુદ્ધઃ ॥ ૧૯॥

નિષ્ઠાં પરં તામધિગત્ય બુદ્ધો
  જીવચ્છરીરોઽપિ વિમુક્ત એવ ।
કરોત્યહન્તાં મમતાં ન દેહે
  બુદ્ધો હ્યતોઽસાવશરીર એવ ॥ ૨૦॥

યન્નિર્મનસ્કં પદમેવમુક્તં
  સુખં તદાત્યન્તિકમન્તહીનમ્ ।
સુખં સમાવૃત્ય મનઃ સ્વયં હિ
  સદૈવ દુઃખં વિવૃણોતિ જન્તોઃ ॥ ૨૧॥

ઋજુઃ શુચિઃ સત્યવચા અમાની
  ધીરો વિરક્તશ્ચ ગુરૌ સુભક્તઃ ।
શમાદિષટ્કેન યુતો મુમુક્ષુઃ

સ્થિતિં પરાં તામચિરાલ્લભેત ॥ ૨૨॥

ધીરક્ષણં યદ્વિદધાતિ સાધુ-
નિર્ગૃહ્ય વૃત્તીર્નિજમાર્ગણાય ।
તદેવ ધીરત્વમિહોપદિષ્ટં
નાપેક્ષતેઽન્યા ખલુ ધીરતાઽત્ર ॥ ૨૩ ॥

ભજેત્ પ્રબુદ્ધં હિ ગુરું મુમુક્ષુઃ
સ્વાજ્ઞાનનિદ્રોત્થિતમસ્તમોહમ્ ।
કથં નુ મર્ત્યઃ સ્વયમપ્રબુદ્ધઃ
પ્રબોધયેદન્યનરાનબુદ્ધાન્ ॥ ૨૪॥

ઈશાદભેદેન કૃતૈવ બુદ્ધે
ગુરૌ સુભક્તિર્ગદિતાઽત્ર સાધોઃ ।
નિર્મોહિતામેત્યચિરાત્ તયૈવ
બુદ્ધઃ પરસ્માન્નહિ કશ્ચિદન્યઃ ॥ ૨૫॥

શમો દમશ્ચોપરતિસ્તિતિક્ષા
શ્રદ્ધા ગુરોર્વાચિ સમાહિતત્વમ્ ।
વિધીયતે ષટ્કમિદં મુમુક્ષોઃ
સ્થિરં ભવેદ્યેન મનો ગવેષે ॥ ૨૬॥

Quote - tr. of Maharshi's Tamil work
વિશ્રાન્તિં જઠરસ્ય મે ન વિતરસ્યેકાં ચ નાડીમહો
નાનશ્નન્ દિવસે ચ તિષ્ઠસિ કદાપ્યેકામહો નાડિકામ્ ।
નો જાનાસિ મદીયદુઃખમતુલં હે દુર્વિનીત ત્વયા ।
સાકં જીવનમત્ર દેહનિલયે મે દુર્ઘટં સમ્પ્રતિ ॥

નિજસ્વરૂપાનુભવૈકવેદ્યં
તન્નેતિ નેતીત્યુદિતં પદં હિ ।
વાચાઽપ્યનુક્તં મનસાઽમતં ચ
મૌનોપદિષ્ટં ગુરુણાઽઽદિમેન ॥ ૨૭॥

અતીત્ય યજ્જાગરમુખ્યભાવાં-
સ્તન્નિષ્પ્રપઞ્ચં ભવતિ પ્રશાન્તમ્ ।
અતસ્તુરીયં પદમવ્યયં તદ્-
ઇત્યેષ માણ્ડૂક્યનિરૂપિતાર્થઃ ॥ ૨૮॥

તિસ્રો હ્યવસ્થાઃ પ્રભવન્તિ જાગ્રત્
સ્વપ્નઃ સુષુપ્તિશ્ચ સમસ્તજન્તોઃ ।

આધારભૂતા ત્રિતયસ્ય ચાસ્ય
   સ્વાજ્ઞાનરૂપાઽસ્તિ સુષુપ્તિરન્યા ॥ ૨૯॥

અસ્મિન્નવસ્થાત્રિતયે સમસ્ત-
   મન્તર્ભવત્યેવ હિ વિશ્વમેતત્ ।
અસ્માદવસ્થાત્રિતયાત્ પરસ્તા-
   દલૌકિકં હ્યસ્તિ તુરીયસત્યમ્ ॥ ૩૦॥

અસ્વપ્નનિદ્રેતિ સુષુપ્તિરુક્તા
   સસ્વપ્નનિદ્રેપ્યુભયં તદન્યત્ ।
અનિદ્રમસ્વપ્નકમસ્તવિશ્વં
   પદં તુરીયં હિ વિમુક્તિધામ ॥ ૩૧॥

સન્ધૌ સુષુપ્તેરથ જાગરસ્ય
   ચિદ્રૂપિણી નિર્મનના સ્થિતિર્યા ।
સા સુસ્થિરા ચેદ્ ભવિતા કથઞ્ચિત્
   સૈવોચ્યતે મુક્તિરિતિ પ્રબુદ્ધૈઃ ॥ ૩૨॥

Quote - from Yoga Vasishtha
   નિદ્રાદૌ જાગરસ્યાન્તે યો ભાવ ઉપજયતે ।
   તં ભાવં ભાવયન્ સાક્ષાદક્ષયાનન્દમશ્નુતે ॥

અજ્ઞાનનિદ્રાપરિભૂતભાવાઃ
   પશ્યન્તિ દુસ્સ્વપ્નમિમં પ્રપઞ્ચમ્ ।
પરિભ્રમન્તિ ત્રિતયેઽત્ર જીવા
   યાવન્ન નિદ્રેયમપૈતિ બોધાત્ ॥ ૩૩॥

નિદ્રાલુરેવં સકલોઽપિ જન્તુ-
   ર્ન કોઽપિ જાગર્તિ હિ જીવલોકે ।
તીર્ણસ્તિસૃભ્યોઽજ્ઞતયા વિમુક્તો
   બુદ્ધસ્તુ જાગર્તિ તુરીયનિષ્ઠઃ ॥ ૩૪॥

જાગર્તિ બુદ્ધો નિજસત્યભાવે
   સમેત્ય નિષ્ઠાં તમસા વિહીને ।
નિદ્રાતિ ચ સ્વપ્નમયે પ્રપઞ્ચે
   સ્વાજ્ઞાનમૂઢૈઃ પરિદૃશ્યમાને ॥ ૩૫॥

તન્નક્તમુક્તં વિદુષો હિ વિશ્વં
   નક્તં તથાઽઽત્માઽવિદુષો જનસ્ય ।
નિષ્ઠામતસ્તાં સહજાં તુરીયાં

જાગ્રત્સુષુપ્તિં નિગદન્તિ બુધાઃ ॥ ૩૬॥

Quote - from BhagavadGita
યા નિશા સર્વભૂતાનાં તસ્યાં જાગર્તિ સંયમી
યસ્યાં જાગ્રતિ ભૂતાનિ સા નિશા પશ્યતો મુનેઃ ॥

સજ્જાગ્રદાદિત્રયમસ્તિ યેષાં
તેષાં તુરીયાભિધયા તદુક્તમ્ ।
સત્ તુર્યમેવાસદિદં ત્રયં યત્
તુર્યાભિધા તસ્ય ભવત્યસાધુ ॥ ૩૭॥

સ્વપ્નેઽપિ જાગ્રત્યપિ ચેષ્ટમાનં
મનઃ પ્રપઞ્ચં સૃજતિ સ્વયં હિ ।
ગત્વા સુષુપ્તૌ બત બીજભાવં
ભૂયઃ પ્રબોધે સૃજતિ પ્રપઞ્ચમ્ ॥ ૩૮॥

મનોઽન્તતો નશ્યતિ નૈવ યાવદ્
ભવેદવસ્થાત્રિતયં હિ તાવત્ ।
મનોવિનાશાદ્ધિ તુરીયનિષ્ઠા
યત્રાન્તતઃ શામ્યતિ વિશ્વમેતત્ ॥ ૩૯॥

જ્ઞાનાભિધા યદ્યપિ સાઽઽત્મનિષ્ઠા
જ્ઞાત્રાદિકેન ત્રિતયેન હીના ।
તત્કિં વિજાનાત્યુત કેન કો વા
જ્ઞાનાભિધા સ્વાત્મતયૈવ નિષ્ઠા ॥ ૪૦॥

આત્મૈવ યસ્મિન્ન ભવત્ સમસ્તં
જાનાતિ તસ્મિન્ બત કેન કિં નુ ।
ઇત્યાત્મનઃ કેવલતૈવ તુર્યે
સન્દર્શિતાઽસ્તિ શ્રુતિશીર્ષવાચા ॥ ૪૧॥

સ્થાનં ચ તદ્ધાનિતિ નાસ્તિ તસ્મિન્
ભેદઃ પદે કશ્ચન વાસ્તવો યત્ ।
આત્માઽદ્વિતીયઃ પરિપૂર્ણ એકઃ
સ્થાનં સ્વયં સ્વસ્ય હિ સન્ સ એકઃ ॥ ૪૨॥

Quote - Upanishad
સ્વે મહિમ્નિ પ્રતિષ્ઠિતઃ । અથવા ન મહિમ્નિ ॥

દ્વૈતં સમસ્તં ખલુ નીતમન્તં
બુદ્ધેન તુર્યે સ્થિતિમેત્ય સત્યે ।

અદ્વૈતનિષ્ઠાઽધિગતાઽસ્તિ તેને-
ત્યદ્વૈતિનં તેન તમેવ વિદ્યાત્ ॥ ૪૩ ॥

અનાત્મનિ સ્વાત્મતયા પ્રતીત્યા
પ્રતીયતે દ્વૈતમિદં હિ સદ્વત્ ।
એવંવિધાજ્ઞાનવિમુક્તભાવ-
મદ્વૈતનિષ્ઠાં નિગદન્તિ બુદ્ધાઃ ॥ ૪૪॥

અદ્વૈતમેવં ન મતં યથાઽન્ય-
ન્નાસ્તિ પ્રચારો મનસો હિ તત્ર ।
અદ્વૈતમુક્તં નિજસત્યભાવે
નિષ્ઠૈવ ચિન્તારહિતાઽસ્તલોકા ॥ ૪૫॥

શાસ્ત્રોદિતાર્થાધિગમેન યસ્તુ
બુદ્ધ્વાઽદ્વયત્વં મતવદ્ધિયૈવ ।
તુષ્યત્યનેનૈવ વિનાઽનુભૂતિં
નાદ્વૈતનિષ્ઠાઽધિગતાઽસ્તિ તેન ॥ ૪૬॥

ન તેન દૃશ્યં પ્રવિલાપિતં હિ
સ્વચિત્સ્વરૂપે પરમાર્થસત્યે ।
શાસ્ત્રાર્થબોધાત્ સમવૈતિ યઃ સ્વં
ન તસ્ય દેહાત્મમતિર્વિનષ્ટા ॥ ૪૭॥

પશ્વાદિકેભ્યોઽપ્યવિશેષ એવ
તસ્યોચ્યતે શઙ્કરદેશિકેન ।
પશુત્વમેતદ્ ગદિતં હિ બુદ્ધે-
ર્વપુર્મિતં યત્ સ્વમવૈતિ જન્તુઃ ॥ ૪૮॥

ન વ્યેત્યતઃ શાસ્ત્રવિદો નરસ્ય
જગત્ સ્વતઃ સત્યમિતિ પ્રતીતિઃ ।
તયા પ્રતીત્યા સતતં વિમૂઢઃ
પરિભ્રમત્યેવ ભવે યથાઽન્યે ॥ ૪૯॥

વાગ્યન્ત્રતુલ્યોઽયમુદીર્યતે ચ
બુદ્ધ્વાઽપિ શાસ્ત્રાર્થમશાન્તચેતાઃ ।
અપણ્ડિતાદપ્યવરોઽયમુક્તો
મદાદિદોષૈઃ પરિભૂતભાવઃ ॥ ૫૦॥

બોધં પરોક્ષં તમિમં વદન્તિ
પરોક્ષ આત્મા તુ ન કર્હિચિત્ સ્યાત્ ।

નિત્યાપરોક્ષસ્ય પરોક્ષબોધો
બોધો યથાર્થો ભવિતા કથં નુ ॥ ૫૧॥

દેહોઽહમસ્મીત્યનુભૂતિરૂપો
ભવત્યબોધઃ ખલુ બન્ધહેતુઃ ।
બોધોઽહમસ્મીતિ વિનાઽનુભૂતિં
કથં વ્રજેન્નાશમબોધ એષઃ ॥ ૫૨॥

ધિયા ધૃતોઽયં હિ પરોક્ષબોધો
ન ધીપ્રચારોઽસ્તિ તુ સત્સ્વરૂપે ।
દૈત્યં યથા પુણ્યજનં વદન્તિ
વદન્ત્યબોધં બત બોધનામ્ના ॥ ૫૩ ॥

યદાઽર્કતપ્તો મૃગતૃષ્ણિકાયાં
સ્નાત્વા નરસ્તાપવિમુક્તિમેતિ ।
અન્નં પચેચ્ચિત્રગતાગ્નિના વા
પરોક્ષબોધેન તદાઽસ્તુ મુક્તિઃ ॥ ૫૪॥

તત્સ્વાનુભૂત્યા રહિતોઽદ્વયત્વં
વાચા વદન્ દ્વૈતિસમાન એવ ।
ન ગચ્છતો વાઙ્મનસે હિ તુર્યં
તત્ર સ્થિતસ્યાસ્તિ મતં ન કિઞ્ચિત્ ॥ ૫૫॥

અદ્વૈતિનઃ સ્વાન્ ગણયન્ત આહુ-
ર્જગન્મૃષા દુઃખમયં જડં ચ ।
અતોઽન્યથૈવેત્યપરે વદન્તિ
ફલે તુ સર્વેઽપિ સમા ભવન્તિ ॥ ૫૬॥

વિશ્વં પરો જીવ ઇતિ ત્રિરૂપં
વિભાતિ સત્યં પરમેકમેવ ।
જ્ઞાનં ભવેનૈવ તુ વાદ એષ
જ્ઞાનં ત્વહઙ્કારવિનાશ એવ ॥ ૫૭॥

નિજસ્વરૂપાનુભવે વિનેચ્છાં
મતાગ્રહેણ પ્રવદન્તિ વાદાન્ ।
અસ્તીતિ નાસ્તીત્યપિ રૂપ્યરૂપી-
ત્યેકં દ્વિધા નોભયથેત્યનન્તાન્ ॥ ૫૮॥

ભવત્યનન્તાઃ ખલુ તર્કવાદાઃ
ક્વચિત્પ્રતિષ્ઠાં ન હિ યાતિ તર્કઃ ।

અલૌકિકોઽસૌ ખલુ તુર્યનિષ્ઠા
 જ્ઞેયા કથં તર્કધિયા ભવેત્ સા ॥ ૫૯॥

મતં ન કિઞ્ચિદ્વિદુષોઽસ્તિ યસ્માત્
 સજ્જેત વાદેષુ કદાઽપિ નાસૌ ।
સર્વં મતં સમ્મતમેવ તસ્ય
 મતિં ન કસ્યાપ્યુત ચાલયેત્ સઃ ॥ ૬૦॥

દ્વેષં વિનાઽન્યેષુ મતેષુ તસ્મા-
 દ્વિહાય વાદાનપિ શાન્તચેતાઃ ।
યતેત સાધુઃ સ્વમતોક્તરીત્યા
 મોક્ષેચ્છયા સાધનતત્પરઃ સન્ ॥ ૬૧॥

દ્વૈતાદ્વયત્વે ભવતો મતે દ્વે
 સત્યં ચ મિથ્યા વદતાં પ્રપઞ્ચમ્ ।
વાદાવુભૌ ચાપિ વિહાય શક્યો
 લબ્ધું સ્વરૂપાનુભવો મુમુક્ષોઃ ॥ ૬૨॥

અદુઃખમિશ્રં સુખમન્તહીનં
 વાઞ્છન્તિ સર્વે ખલુ જન્તવોઽપિ ।
સુખં સ્વભાવો હિ સમસ્તજન્તો-
 સ્તાદૃક્સુખં ક્વેતિ હિ ચિન્તનીયમ્ ॥ ૬૩ ॥

કસ્મિન્ પદે તત્ સુખમસ્ત્યનન્તં
 લભ્યં ચ તત્ કેન ચ સાધનેન ।
દ્વયં તદેતદ્ ભગવાન્ મુમુક્ષો-
 રત્યન્તવૈરાગ્યવતો બ્રવીતિ ॥ ૬૪॥

પ્રિયા સુષુપ્તિર્હિ સમસ્તજન્તોઃ
 પ્રિયત્વહેતુઃ સુખરૂપતાઽસ્યાઃ ।
સુખાય તસ્યાં વિષયા ન સન્તિ
 કિં મૂલકં સ્યાન્નુ સુખં સુષુપ્તેઃ ॥ ૬૫॥

સુષુપ્તિતુર્યે ભવતઃ સમાને
 દ્વયોર્મનો નાસ્તિ હિ નાપિ વિશ્વમ્ ।
આત્મા દ્વયોરસ્તિ તુ નિત્યસત્યઃ
 સ એવ મૂલં હ્યુભયો સુખસ્ય ॥ ૬૬॥

અનિત્યમલ્પં ચ સુખં સુષુપ્તૌ
 મનોઽસ્તિ તસ્યાં ખલુ બીજભાવે ।

તુર્યે પ્રપૂર્ણં સુખમસ્ત્યનન્ત-
માનન્દસંજ્ઞં શ્રુતિષુ પ્રસિદ્ધમ્ ॥ ૬૭॥

તસ્યૈવ માત્રાં ખલુ જીવલોકે
લબ્ધ્વા રમન્તેઽખિલજન્તવોઽપિ ।
ન સ્યાદદીદં તુ સુખસ્ય મૂલં
લોકે ક્ષણાર્ધં બત કો નુ જીવેત્ ॥ ૬૮॥

પ્રેષ્ઠઃ સમસ્તસ્ય તતસ્તુરીયે
વિરાજમાનઃ સુખરૂપકઃ સ્વઃ ।
પ્રેષ્ઠા ચ તસ્માદખિલસ્ય જન્તો-
ર્નિષ્ઠા તુરીયૈવ ન કાચિદન્યા ॥ ૬૯॥

તુર્યં પદં નિત્યસુખસ્ય ધામે-
ત્યેવં પ્રબુદ્ધાદ્વિદિતેઽથ સાધોઃ ।
ઇતો વિરક્તસ્ય તુરીયલિપ્સો-
ર્જગદ્વિચારેણ ફલં કિમસ્તિ ॥ ૭૦॥

સન્ વાઽન્યથા વા ભવતુ પ્રપઞ્ચો
લબ્ધવ્યમત્રાસ્તિ કિમસ્ય સાધોઃ ।
સત્ તુર્યમદ્વૈતમુતાન્યથા વા-
ઽપ્યાસ્તાં તદેવેપ્સિતમસ્ય નાન્યત્ ॥ ૭૧॥

કિમદ્વયં સત્ કિમુનેતિ બોદ્ધું
શક્યે હિ તુર્યે સ્થિતિમેત્ય સત્યે ।
શક્નોતિ કસ્તત્ત્વમદો નિબોદ્ધું
ભ્રામ્યન્નવસ્થાત્રિતયે વિમુગ્ધઃ ॥ ૭૨॥

ક્ષેપો હિ લોમ્નાં નિકરસ્ય યુક્તઃ
ક્ષુરાપનીતસ્ય વિના પરીક્ષામ્ ।
તુચ્છસ્ય તદ્વજ્જગતોઽસ્ય દાનં
ચર્ચાં વિના યુજ્યત એવ સાધોઃ ॥ ૭૩ ॥

હેયં પ્રપઞ્ચં સ વિહાય તૂર્ણ-
મન્તર્મુખત્વેન યતેત સિદ્ધ્યૈ ।
અન્તર્મુખત્વેન હિ સાધનં સ્યાદ્
વિશ્વં તદર્થં નનુ હેયમેવ ॥ ૭૪॥

પરં તુ વૈરાગ્યબલેન હીના
જગત્ સ્વતઃ સત્યમિતિ પ્રતીત્યા ।

ન સાધતેઽન્તર્મુખતાં ભજન્તે
  તેષામપેક્ષ્યો હિ વિચાર એષઃ ॥ ૭૫॥

એતે વિચારેણ ગુરૂક્તરીત્યા
  જગન્ન સત્યં સ્વત ઇત્યવેત્ય ।
તથૈવ બુદ્ધ્યાઽપ્યનુસન્દધાના
  અન્તર્મુખત્વં શનકૈર્ભજેયુઃ ॥ ૭૬॥

યા લૌકિકેનાનુભવેન ચર્ચા
  સ્વબુદ્ધિશક્ત્યાઽપિ વૃથૈવ સા સ્યાત્ ।
બુદ્ધં શ્રયિત્વૈવ ગુરું તુ કુર્યાત્
  તદ્દિષ્ટરીત્યૈવ જગદ્વિચારમ્ ॥ ૭૭॥

અજ્ઞાનમૂલોઽનુભવો હિ સર્વઃ
  સાંસારિકઃ સ્વપ્નસમોઽજ્ઞપુંસામ્ ।
મૃષૈવ સર્વોઽયમતો મુમુક્ષો-
  ર્ન હિ પ્રમાણં સદસદ્વિવેકે ॥ ૭૮॥

બુદ્ધાનુભૂતિર્હિ પરં પ્રમાણં
  સાધોસ્તુરીયસ્ય પદસ્ય લિપ્સોઃ ।
સ એવ તત્ત્વં જગતોઽપ્યવૈતિ
  બોધાત્ તુરીયસ્ય સતઃ પરસ્ય ॥ ૭૯॥

નિજાનુભૂતિં ચ વદન્ સ બુદ્ધઃ
  સન્દર્શયિષ્યત્યમલાશ્ચ યુક્તીઃ ।
પ્રશ્નાનનન્તાંસ્તુ બુધો ન કુર્યાત્
  સાધોર્ન શઙ્કાસ્પદમાપ્તવાક્યમ્ ॥ ૮૦॥

Quote - BhagavadGita
    સંશયાત્મા વિનશ્યતિ
ન સંશયાનાં ભવિતા વિરામો
  યાવન્ન તુર્યે સ્થિતિમેતિ બોધાત્ ।
અન્તોઽસ્તિ તત્રૈવ હિ સંશયાના-
  માત્યન્તિકઃ સંશયિતુર્વિનાશાત્ ॥ ૮૧॥

Quote - Upanishad
  ભિદ્યતે હૃદયગ્રન્થિઃ છિદ્યન્તે સર્વસંશયાઃ ।
  ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્ દૃષ્ટે પરાવરે ॥

તર્કોઽપ્રતિષ્ઠો હિ તતો મુમુક્ષુઃ

સદ્યોઽન્તતસ્તર્કમતિં વિહાય ।
શ્રદ્ધાં સમાલમ્બ્ય ગુરોર્વચસ્સુ
તદ્દિષ્ટમાર્ગેણ યતેત સિદ્ધ્યૈ ॥ ૮૨॥

ઉદેતિ શઙ્કા યદિ કસ્ય સેતિ
પૃચ્છન્ સ્વતત્ત્વસ્ય ગવેષણેન ।
લભેત નિષ્ઠાં યદિ તુર્યભાવે
શઙ્કા ચ તદ્વાનુભયં ચ નશ્યેત્ ॥ ૮૩ ॥

બુદ્ધો ગુરુર્વક્તિ જગન્મૃષાત્વં
સહેતુકં સ્વાનુભવાનુરૂપમ્ ।
સત્યોપદેશં તમિમં મુમુક્ષુઃ
સચ્છ્રદ્ધયાઽઽલમ્બ્ય યતેત સિદ્ધ્યૈ ॥ ૮૪॥

જીવેશ્વરૌ વિશ્વમિતિ ત્રિરૂપં
જગત્ સમસ્તં ચ તુરીયસત્યે ।
અધ્યસ્તમેવાત્મનિ માનસેને-
ત્યજ્ઞાનકાર્યં બત સર્વમેતત્ ॥ ૮૫॥

સત્યેવમજ્ઞાનમિદં યદા તુ
સ્વજ્ઞાનભાસ ભજતે વિનાશમ્ ।
કાર્યં તદીયં ચ સહૈવ નશ્યેત્
તમો યથાઽર્કપ્રભયા પ્રભાતે ॥ ૮૬॥

ભાતીદમજ્ઞાનતમોવિલાસે
ન ભાતિ સુજ્ઞાનમહાપ્રકાશે ।
સચ્ચેદિદં ભાતિ કુતો ન તુર્યે
સત્યાત્મનશ્ચિત્પ્રભયા પ્રદીપ્તે ॥ ૮૭॥

શિષ્યેત યત્ સ્વાનુભવે તુરીયે
સત્યં તદેવાન્યદસત્યમેવ ।
સત્યત્વમિથ્યાત્વવિભાગ એષ
બુદ્ધોપદેશૈર્ભવતિ સ્ફુટો નઃ ॥ ૮૮॥

યતોઽજ્ઞતાયામનુભૂયમાનં
તસ્માદસદ્ દ્વૈતમિદં નિરુક્તમ્ ।
અજ્ઞાનનાશાદનુભૂયમાના
સત્યા ભવત્યદ્વયતાઽઽત્મનસ્તુ ॥ ૮૯॥

પદે પરસ્મિન્ ભુવને વિનષ્ટે

યચ્ચિન્મયઃ સ્વો લસતિ સ્વભાસા ।
શાન્તઃ સ એવાદ્વય એકકઃ સ-
ન્નિત્યસ્મદાચાર્યનિરૂપિતાર્થઃ ॥ ૯૦॥

સ્વપ્નઃ પ્રબોધે નિધનં પ્રયાતી-
ત્યતો હિ મિથ્યેત્યવગમ્યતેઽસૌ ।
જાગ્રત્પ્રપઞ્ચોઽપિ તથાઽઽત્મભાવે
વિનશ્યતીત્યસ્ય મૃષાત્વસિદ્ધિઃ ॥ ૯૧॥

પરાઙ્મુખાસ્તુર્યપદસ્ય લાભાદ્
વાદાંસ્તુ મુગ્ધાઃ પ્રવદન્ત્યનન્તાન્ ।
તજ્જન્યશઙ્કાઃ શમયન્તિ બુદ્ધા
મુહ્યેદ્યથા તૈર્ન મુમુક્ષુલોકઃ ॥ ૯૨॥

આત્મા શરીરં સ્વયમેવ યેષાં
સોઽયં શરીરી ભવિતા ચ યેષામ્ ।
નોક્તં હિ તાન્ પ્રત્યનૃતત્વમસ્ય
તેષાં ભવેદ્વિશ્વમિદં સદેવ ॥ ૯૩॥

જીવેશ્વરૌ વિશ્વમિતિ ત્રયસ્ય
મિથ્યાત્વમુક્તં હ્યવિભક્તમેવ ।
ત્રિષ્વેકકં સત્યમવૈતિ યસ્તુ
દ્વયં તદન્યચ્ચ સદેવ તસ્મૈ ॥ ૯૪॥

મુમુક્ષુપુંસામુપદિશ્યતે તુ
સમાનમેવ ત્રિતયં મૃષેતિ ।
ગ્રાહ્યં તથૈવેહ યથોપદિષ્ટં
વિમુક્તિમિચ્છદ્ભિરબોધનાશાત્ ॥ ૯૫॥

ગ્રાહ્યઃ સમગ્રોઽપ્યુપદેશ એષ
ત્યાજ્યોઽથવા બુદ્ધિમતા સમગ્રમ્ ।
કઃ કુક્કુટીં કલ્પયિતું સમર્થઃ
પાકાય ચાર્ધં પ્રસવાય ચાર્ધમ્ ॥ ૯૬॥

કુતો નુ વિશ્વં સદિતિ પ્રતીત-
મિતીદમાદૌ પરિશીલનીયમ્ ।
પ્રપઞ્ચસત્તાપ્રતિપાદનસ્ય
ભારોઽસ્તિ તદ્વક્તૃશિરસ્થ એવ ॥ ૯૭॥

યદ્વીક્ષ્યતે વિશ્વમતોઽજ્ઞલોકઃ

સદેવ વિશ્વં મનુતે હિ સર્વઃ ।
નૈતત્ પ્રમાણં વ્યભિચારદોષા-
ન્મરીચિકારજ્જુભુજઙ્ગમાદૌ ॥ ૯૮॥

યથા પ્રતીતં ભુવનં સદેવે-
ત્યેતન્ન સિદ્ધં ભવતીક્ષણેન ।
કિમપ્યધિષ્ઠાનસદસ્તિ યસ્મિ-
ન્નિદં વિભાતીત્યનુમેયમત્ર ॥ ૯૯॥

યદ્યદ્યથા ભાતિ ન તત્ તથેતિ
વૈજ્ઞાનિકૈરેવ નિરૂપિતં હિ ।
દ્રવ્યં સુનીરન્ધ્રમિવ પ્રતીતં
ચાકાશકલ્પં ગદિતં યતસ્તૈઃ ॥ ૧૦૦॥

જાનાત્યધિષ્ઠાનસદસ્ય યસ્તુ
તુરીયભાવે સમુપેત્ય નિષ્ઠામ્ ।
બુદ્ધઃ સ એવ પ્રભવેદ્ધિ વક્તું
કિમસ્ય તત્ત્વં ભવતીતિ નાન્યઃ ॥ ૧૦૧॥

બહિર્મુખત્વે સતિ કો નુ વિદ્યાદ્
યથાવદાત્માનમુત પ્રપઞ્ચમ્ ।
અન્તર્મુખત્વેન તુ બોધદૃષ્ટ્યા
જાનાતિ તત્ત્વં હ્યુભયોશ્ચ બુદ્ધઃ ॥ ૧૦૨॥

કથં નુ માં જ્ઞાસ્યસિ તત્ત્વતસ્ત્વં
જ્ઞાતું સ્વમાત્માનમુતાસમર્થઃ ।
ઇત્યજ્ઞમર્ત્યં હસતિ પ્રપઞ્ચ
ઇત્યેવમૂચે ભગવાન્ ગુરુર્નઃ ॥ ૧૦૩॥

આવિદ્યકત્વાજ્જગદીક્ષણસ્ય
વાદં નિરાધારમિમં પ્રદર્શ્ય ।
જગન્મૃષાત્વં પ્રકટીકરોતિ
સ્ફુટં ગુરુર્નો ભગવાન્ પ્રબુદ્ધઃ ॥ ૧૦૪॥

શરીરમેવાત્મતયાઽવગમ્ય
તત્ સત્યમેવેત્યપિ નિશ્ચયેન ।
પ્રત્યેતિ સત્યં સકલં હિ રૂપં
સર્વોઽપિ જન્તુઃ પરિદૃશ્યમાનમ્ ॥ ૧૦૫॥

રૂપાણિ સર્વાણિ મૃષૈવ તસ્મા-

ન્ન તાનિ સત્યાનિ હિ બુદ્ધપુંસઃ ।
યદસ્તિ સત્યં તદરૂપમેવ
ન રૂપિ કિઞ્ચિત્ પરમાર્થદૃષ્ટ્યા ॥ ૧૦૬॥

દૃષ્ટ્યૈકયા પશ્યતિ રૂપિણં સ્વં
સરૂપકં વિશ્વમુતાજ્ઞમર્ત્યઃ ।
સા દૃષ્ટિરજ્ઞાનમયીતિ હેતોઃ
પ્રમાણહીનૈવ હિ વિશ્વસત્તા ॥ ૧૦૭॥

વપુઃપ્રપઞ્ચાવિતિ દૃશ્યમેકં
વીક્ષાઽપ્યવીક્ષાઽપ્યુભયોઃ સહૈવ ।
વિનાઽઽત્મનો રૂપમિદં શરીરં
કિં ન્વીક્ષતે કશ્ચન વિશ્વમેતત્ ॥ ૧૦૮॥

સ્વાપ્નં પ્રપઞ્ચં વપુષા વિહીનાઃ
પશ્યામ ઇત્યેવમુદીર્યતે ચેત્ ।
તિસૃષ્વવસ્થાસ્વપિ ચાસ્તિ દેહઃ
કદાઽપ્યદેહી ન ભવેદ્ધિ જીવઃ ॥ ૧૦૯॥

દેહાસ્ત્રયઃ સન્તિ હિ સર્વજન્તોઃ
સ્થૂલોઽપિ સૂક્ષ્મોઽપિ ચ કારણાત્મા ।
મનોમયઃ સૂક્ષ્મ ઉદીર્યતે ચા-
પ્યુક્તસ્ત્ત્વવિદ્યૈવ ચ કારણાખ્યઃ ॥ ૧૧૦॥

ઉક્તં શરીરત્રિતયં યદેતત્
તત્ પઞ્ચકોશાત્મકમુચ્યતે ચ ।
મધ્યં ત્રયં સૂક્ષ્મશરીરમુક્તં
કોશોઽન્તિમઃ કારણદેહ ઉક્તઃ ॥ ૧૧૧॥

યાવન્ન બોધાત્ ત્રિતયં વિનશ્યેત્
સ્યાદ્ દેહવાનેવ હિ જીવનામા ।
તુરીયભાવે હ્યશરીરતાઽસ્તિ
સહૈવ યસ્મિંસ્ત્રિતયં વિનશ્યેત્ ॥ ૧૧૨॥

સ્વાવિદ્યયા કલ્પયન્તેઽન્યદેહં
સ્વપ્ને મનોઽન્યદ્ ભુવનં સ્વયં હિ ।
સ્વાપ્નેન દેહેન સહૈવ સુપ્તઃ
સ્વાપ્નં જગત્ પશ્યતિ ન ત્વરૂપઃ ॥ ૧૧૩ ॥

દેહં ચ વિશ્વં ચ સમીક્ષતે હિ

નેત્રેણ દેહાવયવેન સર્વઃ ।
કથં પ્રમાણં ભવિતેયમીક્ષા
વિશ્વસ્ય સત્યત્વવિચારણેઽસ્મિન્ ॥ ૧૧૪॥

દૃક્ સ્યાદ્યથા તાદૃશમેવ દૃશ્યં
દૃગાશ્રયોઽયં ખલુ દૃશ્યભાવઃ ।
દૃક્ ચેત્ સરૂપાઽસ્તિ તથૈવ દૃશ્યં
દૃક્ ચેદરૂપાઽસ્તિ ન રૂપવીક્ષા ॥ ૧૧૫॥

ભાત્યજ્ઞતાયાં ખલુ સર્વજન્તોઃ
પ્રપઞ્ચ આત્મા દ્વિતયં સરૂપમ્ ।
અજ્ઞાનનાશે દ્વયમપ્યરૂપ-
મનન્ત આત્મૈવ હિ દૃક્ તદાનીમ્ ॥ ૧૧૬॥

જ્ઞાનેક્ષયા હ્યાત્મનિ રૂપહીને
યાત્યેકતાં વિશ્વમિદં સજીવમ્ ।
દ્રષ્ટાઽપિ દૃશ્યં ભવતો ન યસ્યાં
તાં જ્ઞાનવીક્ષાં નિગદન્તિ બુદ્ધાઃ ॥ ૧૧૭॥

ચિદ્રૂપ આત્મૈવ હિ નિષ્પ્રપઞ્ચ
એકઃ પદે સ્વે પરિશિષ્ટ આસ્તે ।
જન્માદિષડ્ભાવવિકારહીનઃ
સ એવ તસ્માદ્ ગદિતઃ સ્વતઃ સન્ ॥ ૧૧૮॥

અનન્તદૃઙ્નામ નિગદ્યતેઽસૌ
પરઃ સ આત્મા પરિપૂર્ણ એકઃ ।
ન તસ્ય દૃક્ત્વં તુ યથાર્થતોઽસ્તિ
સત્યાત્મનો દૃશ્યવિવર્જિતત્વાત્ ॥ ૧૧૯॥

અચિત્સ્વરૂપત્વનિવારણાય
કૃતો દૃગિત્યત્ર પદપ્રયોગઃ ।
જ્ઞાનસ્વરૂપત્વમુતાદ્વયત્વં
તસ્યૈવ મુક્તે ભગવત્તમેન ॥ ૧૨૦॥

અરૂપિણઃ સ્વસ્ય સરૂપતાં હિ
મત્વેક્ષતે વિશ્વમિદં સરૂપમ્ ।
અવિદ્યયાઽધ્યસ્તમિદં સમસ્તં
હ્યાત્મન્યરૂપે પરસત્યનન્તે ॥ ૧૨૧॥

અનામકેઽરૂપિણિ ચિત્સ્વરૂપે

તસ્મિન્નવિદ્યાપરિકલ્પિતાનિ ।
નામાનિ રૂપાણિ વિભાન્તિ સદ્વત્
સ્વં રૂપિણં પશ્યત એવ પુંસઃ ॥ ૧૨૨॥

આવિદ્યકત્વં જગદીક્ષણસ્ય
વિસ્પષ્ટમેવં ગુરુણોપદિષ્ટમ્ ।
એવં નિરસ્તા જગતોઽસ્ય સત્તા
દિષ્ટાઽઽત્મનઃ કેવલતાઽપિ સત્યા ॥ ૧૨૩ ॥

સ્થિરીકરોત્યર્થમિમં ગુરુર્નો
મનોમયત્વં જગતો નિરૂપ્ય ।
તતો મૃષાત્વં મનસોઽહમશ્ચ
મૂલાજ્ઞતાયા અપિ ચોપદિશ્ય ॥ ૧૨૪॥

શબ્દાદિકા યે વિષયાસ્ત એવ
રૂપં હિ વિશ્વસ્ય ન કિઞ્ચિદન્યત્ ।
પ્રતીતયસ્તે મનસો હિ સર્વે
તદ્વિશ્વમેતન્મન એવ નાન્યત્ ॥ ૧૨૫॥

યદ્યસ્તિ વિશ્વં મનસો વિભિન્ન-
મભાનમેતસ્ય કુતઃ સુષુપ્તૌ ।
ચિદ્રૂપ આત્માઽસ્તિ હિ તત્ર સત્યો
યદીયભાસા મનસો મનસ્ત્વમ્ ॥ ૧૨૬॥

Quote - Vivekachudamani
યદિ સત્યં ભવેદ્વિશ્વં સુષુપ્તાવુપલભ્યતામ્ ।
યન્નોપ્લભ્યતે કિઞ્ચિદતોઽસત્ સ્વપ્નવન્મૃષા ॥

યદા મનશ્ચેષ્ટિતમસ્તિ પુંસાં
તદૈવ વિશ્વં ખલુ ભાતિ તેષામ્ ।
મનોમયં વિશ્વમિદં હિ તસ્માત્
સ્વપ્ને યથા જાગરિતે તથૈવ ॥ ૧૨૭॥

યથૈવ જાગ્રજ્જગદેવમેવ
સ્વાપ્નં સ્વકાલે પ્રતિભાતિ સદ્વત્ ।
જાગ્રત્પ્રપઞ્ચો વ્યવહારયોગ્યો
યદ્વત્ તથા સ્વાપ્ન ઉત સ્વકાલે ॥ ૧૨૮॥

સ્વાપ્નં યથા દૃશ્યમભિન્નમેવ
ચિત્તાદ્ ભવેત્ સ્વપ્નદૃશો નરસ્ય ।

દૃશ્યં તથા જાગ્રતિ વીક્ષકસ્ય
ચિત્તાદ્ ભવેત્ સર્વમભિન્નમેવ ॥ ૧૨૯॥

મનોમયત્વે જગતઃ સુસિદ્ધે
સિદ્ધં મૃષાત્વં ભવતીતિ ભીતાઃ ।
બહિઃસ્થિતત્વં જગતોઽજ્ઞમર્ત્યા
અનેકધા સાધયિતું યતન્તે ॥ ૧૩૦॥

જગન્મૃષાત્વં ગદિતં તુ બુદ્ધૈઃ
સ્વાન્વેષણાત્ તુર્યપદસ્ય લિપ્સોઃ ।
નાન્યાન્ પ્રતીદં હ્યુપદિષ્ટમસ્તિ
તતો વૃથૈવેહ તદીયવાદાઃ ॥ ૧૩૧॥

સ્વાપ્નસ્ય વિશ્વસ્ય મૃષાત્મકત્વં
સ્વપ્ને ન શક્નોતિ હિ કોઽપિ બોદ્ધુમ્ ।
તથૈવ જાગ્રદ્ ભુવનં મૃષેતિ
શક્નોતિ બોદ્ધું ન હિ જાગરેઽસ્મિન્ ॥ ૧૩૨॥

ન દોષહીનં ભવતિ પ્રમાણં
બહિઃસ્થિતત્વે જગતોઽસ્ય કિઞ્ચિત્ ।
સાધ્યં સ્વપક્ષં બત સિદ્ધવત્તુ
કૃત્વૈવ વાદાંસ્ત ઇમે વદન્તિ ॥ ૧૩૩॥

અન્તર્હિ શબ્દાદિકબોધજન્મ
બહિસ્તુ તત્કારણમસ્તિ વિશ્વમ્ ।
ઇત્યુચ્યતે ચેદ્ વદ સન્ કથં સ્યા-
દન્તર્બહિશ્ચેતિ વિભાગ એષઃ ॥ ૧૩૪॥

લોકેઽનુભૂતઃ સકલો વિભાગો
દેહાશ્રયેણૈવ હિ ભાતિ સદ્વત્ ।
દેહસ્ય સત્તાં પ્રતિ ન પ્રમાણં
પૃથક્ કિમપ્યસ્તિ સમર્પિતં તૈઃ ॥ ૧૩૫॥

અલ્પં મનો વિશ્વમિદં વિશાલં
સ્યાદન્તરેતન્મનસઃ કથં નુ ।
ઇત્યેષ વાદોઽપ્યુત મુગ્ધતૈવ
વિશાલમુક્તં મન એવ બુદ્ધૈઃ ॥ ૧૩૬॥

આકાશતશ્ચાપિ બૃહન્મનો હિ
તસ્મિન્ હિ ખાદીનિ ભવન્તિ પઞ્ચ ।

ચિન્નિશ્ચલા બ્રહ્મ ચલા મનશ્ચે-
   ત્યેવં મનો બ્રહ્મમયં નિરુક્તમ્ ॥ ૧૩૭॥

સુપ્તૌ તવાસીત્ કિમિદં ન વેતિ
   શઙ્કાસ્તિ ચેત્ પૃચ્છ નરાનસુપ્તાન્ ।
આસીદવિચ્છિન્નતયૈવ વિશ્વ-
   મિત્યેવ તેષામવગચ્છ વાચા ॥ ૧૩૮॥

એવં સ્વપક્ષં બત સિદ્ધવત્તુ
   કૃત્વૈવ વાદોઽયમુદીર્યતેઽજ્ઞૈઃ ।
અન્તર્ભવન્ત્યેવ હિ તેઽપ્યસુપ્તા
   નરાઃ પ્રપઞ્ચેઽત્ર વિચાર્યમાણે ॥ ૧૩૯॥

વીક્ષામહે તાન્ મનુજાનસુપ્તાન્
   વયં પ્રબુધ્યૈવ હિ નૈવ સુપ્તૌ ।
અસુપ્તપુંસાં ન હિ સત્યતાયાઃ
   કિઞ્ચિત્ પ્રમાણં પૃથગસ્તિ દત્તમ્ ॥ ૧૪૦॥

તે ચાપ્યસુપ્તા મનસૈવ વિશ્વં
   જાનન્તિ નો તેન વિના કદાઽપિ ।
સર્વસ્ય તન્માનસમેવ વિશ્વં
   સ્વપ્ને યથા જાગરિતેઽપિ તદ્વત્ ॥ ૧૪૧॥

ભાત્યેકરૂપં હિ જગદ્ બહૂના-
   મિત્યુચ્યતે ચાસ્ય બહિઃસ્થિતત્વમ્ ।
નવીક્ષકાણાં બહુતા યથાર્થે-
   ત્યુક્તૈષ વાદો ગુરુણા નિરસ્તઃ ॥ ૧૪૨॥

અનેકતૈષા મનસા કૃતૈવ
   સ્વપ્ને યથા જાગરિતેઽપ્યબોધાત્ ।
નાનેકતા ભાતિ હિ વીક્ષકાનાં
   સુષુપ્તિભાવે મનસા વિહીને ॥ ૧૪૩॥

મનઃ પ્રપઞ્ચં સૃજતિ સ્વયં હિ
   સ્વપ્ને યથા જાગરિતે તથૈવ ।
સ્વસૃષ્ટમેવેતિ મનો ન વેત્તિ
   સ્વપ્ને યથા જાગરિતેઽપિ તદ્વત્ ॥ ૧૪૪॥

યથેપ્સિતં સ્રષ્ટુમશક્તમેવ
   મનોઽવશં સત્ સૃજતિ પ્રપઞ્ચમ્ ।

અતો હિ વિશ્વં સદિતિ પ્રતીત્યા
   ભ્રાન્તં ભૃશં સંસરતિ સ્વયં ચ ॥ ૧૪૫॥

મનોરથે નાટકવીક્ષણે ચ
   તથા કથાસંશ્રવણેઽપિ ચિત્તમ્ ।
પ્રત્યેતિ સત્યં સકલં સ્વસૃષ્ટ-
   મેષ સ્વભાવો મનસો હિ નિત્યઃ ॥ ૧૪૬॥

દૃષ્ટેર્ન સૃષ્ટિઃ પૃથગસ્તિ કાચિદ્
   દૃષ્ટિશ્ચ સૃષ્ટિર્દ્વયમેકમેવ ।
દૃષ્ટેર્વિરામો નિધનં હિ નાન્ય-
   ન્નશ્યેદ્ધિ વિશ્વં નિજતત્ત્વબોધાત્ ॥ ૧૪૭॥

સિદ્ધે પ્રપઞ્ચસ્ય મનોમયત્વે
   સચ્ચેન્મનઃ સન્ ભવિતા પ્રપઞ્ચઃ ।
અસન્ પ્રપઞ્ચોઽપિ મનસ્ત્વસચ્ચેત્
   તતો વિચાર્યા મનસોઽથ સત્તા ॥ ૧૪૮॥

કૈર્લક્ષણૈઃ સ્યાત્ સદસદ્વિવેક
   ઇત્યત્ર પૂર્વં પરિશીલનીયમ્ ।
સલ્લક્ષણં લૌકિકસમ્મતં યત્
   તન્ન પ્રમાણં ખલુ સદ્વિચારે ॥ ૧૪૯॥

કીરો યથા શાલ્મલિભૂરુહસ્ય
   લુબ્ધઃ ફલે વઞ્ચિત એવ યાતિ ।
એવં સ્વયં વઞ્ચયતઃ સ્વમેવ
   મતં પ્રમાણં ભવિતા કથં નુ ॥ ૧૫૦॥

ધીરિન્દ્રિયાણ્યપ્યુત માનસં ચ
   ભવન્ત્યવિદ્યાપરિચારકાણિ ।
અતઃ પ્રમાણાનિ હિ લૌકિકાનિ
   નૈવોપકુર્વન્તિ વિચારણેઽસ્મિન્ ॥ ૧૫૧॥

સલ્લક્ષણં લૌકિકસમ્મતં યત્
   તદેતદાવિદ્યકમિત્યસાધુ ।
સાધોઃ પ્રમાણં ગદિતો હિ બુદ્ધૈઃ
   સત્યત્વમિથ્યત્વવિભાગ એવ ॥ ૧૫૨॥

ભાસા સ્વયા યદ્વિલસત્યજસ્રં
   વિના વિકારં ચ લયોદયાભ્યામ્ ।

તદેવ સત્યં હિ તતોઽન્યથા તુ
સર્વં મૃષૈવેતિ વદન્તિ બુદ્ધાઃ ॥ ૧૫૩ ॥

કદાઽપ્યસત્યસ્ય ભવેન્ન સત્તા
ભવેદસત્તા ન સતઃ કદાઽપિ ।
ઇત્યેવમૂચે સદસદ્વિવેકં
ગીતાસુ કૃષ્ણો ભગવાન્ સ્વયં હિ ॥ ૧૫૪॥

આદ્યન્તયોર્ભાવવિવર્જિતં યન્-
મધ્યેઽપિ તદ્ ભાવવિહીનમેવ ।
યદ્દેશકાલપ્રમિતં વિભાતિ
તત્સત્યતાધીર્બત મુગ્ધતૈવ ॥ ૧૫૫॥

સત્યોપમાનં ગદિતં સુવર્ણં
મિથ્યોપમાનાનિ વિભૂષણાનિ ।
સત્યં સુવર્ણં રુચકાન્યપેક્ષ્ય
વિનશ્વરત્વાદ્રુચકાનિ મિથ્યા ॥ ૧૫૬॥

સુવર્ણમાસન્ રુચકાનિ પૂર્વં
તદેવ મધ્યેઽપિ તદેવ ચાન્તે ।
અસન્તિ સત્યે વિલસન્તિ સદ્વત્
સ્વર્ણે યથા સન્તિ વિભૂષણાનિ ॥ ૧૫૭॥

રીત્યાઽનયા વિશ્વમિદં મનશ્ચ
દ્વયં ચ મિથ્યૈવ પરીક્ષમાણે ।
ઇત્યેવમર્થો ભગવત્તમેન
દિષ્ટો યથા તત્ક્રમ ઉચ્યતેઽત્ર ॥ ૧૫૮॥

ભાસ્યં જગદ્ ભાસકમસ્ય ચેતો
લયોદયૌ દ્વે ભજતઃ સહૈવ ।
ન ભાત્યવિચ્છિન્નતયા દ્વયં ચે-
ત્યતો દ્વયં ચાપિ મૃષેતિ વિદ્યાત્ ॥ ૧૫૯॥

ભવેત્ તુ યદ્યદ્ વિરલપ્રકાશં
તત્તજ્જડત્વેન પરપ્રકાશ્યમ્ ।
જડસ્ય સર્વસ્ય ચ ભાસકં યત્
સ્વયમ્પ્રભં તદ્ધિ ચિતિસ્વભાવમ્ ॥ ૧૬૦॥

સ્વતત્ત્વબોધાદહમાદિનાશે
યચ્છિષ્યતે શાન્તપદે પરસ્મિન્ ।

સત્યં તદન્યન્નિખિલં મૃષેતિ
   જાનીમહેઽસ્મદ્ ગુરુદેવવાગ્ભિઃ ॥ ૧૬૧॥

મનોઽપિ મિથ્યા યદિ શૂન્યતૈવ
   પ્રાપ્તા સુષુપ્તૌ ન હિ કિઞ્ચિદસ્તિ ।
યે વાદમેવં સમુદાહરન્તિ
   સ્વાનેવ તેઽજ્ઞા બત વિસ્મરન્તિ ॥ ૧૬૨॥

શૂન્યત્વમેતદ્વિદિતં કથં નુ
   નૈવાસ્ય સાક્ષી યદિ કશ્ચિદસ્તિ ।
નિસ્સાક્ષિકા નૈવ હિ શૂન્યતેય-
   મતો ન શૂન્યત્વમિદં યથાર્થમ્ ॥ ૧૬૩ ॥

શૂન્યત્વવાદો ભગવત્તમેન
   નિસ્સંશયં હ્યસ્તિ નિરસ્ત એવમ્ ।
નાસ્માકમત્રાસ્તિ હિ કાઽપિ શઙ્કા
   તુર્યેઽસ્તિ શિષ્ટઃ ખલુ સત્ય આત્મા ॥ ૧૬૪॥

આત્મા સ્વયઞ્જ્યોતિરહંસ્વરૂપો
   ભાતિ સ્વભાસા હૃદિ સર્વજન્તોઃ ।
સર્વોઽપ્યતઃ સ્વં સમવૈતિ સન્તં
   નાસ્મીતિ કો ન્વસ્તિ વદન્નૃલોકે ॥ ૧૬૫॥

મન્યે તતોઽસ્મીત્યનુમીયતે તુ
   વૃત્ત્યા ધિયઃ કૈશ્ચન નૈજસત્તા ।
અમી ગજં યાન્તમુપેક્ષ્ય મન્દાઃ
   પદાનિ વીક્ષ્ય પ્રતિયન્તિ પશ્ચાત્ ॥ ૧૬૬॥

સર્વાનુભૂતાઽસ્તિ હિ નૈજસત્તા
   સુષુપ્તિભાવે મનસા વિહીને ।
સુખં મયા સુપ્તમિતિ બ્રુવાણઃ
   સુખસ્મૃતિં ચ પ્રકટીકરોતિ ॥ ૧૬૭॥

અન્યાનુભૂતસ્મરણં કુતઃ સ્યાત્
   સ્વેનાનુભૂતં હિ સુખં સુષુપ્તેઃ ।
અન્યોઽહમન્યઃ પુરુષઃ સુષુપ્તેઃ
   પૂર્વં ચ આસીદિતિ કો નુ વક્તિ ॥ ૧૬૮॥

લયોદયાભ્યાં રહિતે હિ તસ્મિન્
   મનઃ સવિશ્વં લયમેતિ સુપ્તૌ ।

ઉદેતિ તસ્માચ્ચ પુનઃ પ્રબોધે
   શૂન્યત્વવાદોઽયમતો મૃષૈવ ॥ ૧૬૯॥

આધારસદ્વસ્તુ વિના કથં નુ
   વિશ્વં મનશ્ચેત્યુભયં ચ ભાયાત્ ।
રજ્જું વિના કોન્વિહ વીક્ષતેઽહિં
   શુક્તિં વિના પશ્યતિ કો નુ રૌપ્યમ્ ॥ ૧૭૦॥

અસ્તિત્વભાને ભુવનસ્ય યચ્છ-
   દસ્ત્યેવ સત્ કિઞ્ચન ચિત્સ્વરૂપમ્ ।
નો ચેત્ કથં ધીરુદિયાન્મૃષેદ-
   મસ્તીતિ ભાતીત્યપિ લૌકિકાનામ્ ॥ ૧૭૧॥

તદ્ભાસ્યમેવ દ્વિતયં ચ યસ્માત્
   સ્વયમ્પ્રભં તચ્ચિતિરૂપમેવ ।
નાત્મસ્વરૂપાત્ પૃથગસ્તિ સત્યં
   સ્વયમ્પ્રભં કિઞ્ચન કુત્રચિદ્વા ॥ ૧૭૨॥

બોધોદયે સ્વાત્મનિ ભાસમાને
   નાર્કેન્દુનક્ષત્રગણા વિભાન્તિ ।
તસ્યૈવ ભાસા ખલુ ભાન્તિ તાનિ
   બહિર્મુખસ્યાજ્ઞજનસ્ય લોકે ॥ ૧૭૩ ॥

ચિતા યયા ભાતિ જગત્ સમસ્તં
   ભાસાઽપિ યસ્યા મનસો મનસ્ત્વમ્ ।
સૈવાત્મરૂપં ભવતીતિ હેતો-
   રાત્માસ્તિતાયાં ન હિ કાઽપિ શઙ્કા ॥ ૧૭૪॥

અસ્મીતિ બોધં ન રુણદ્ધ્યવિદ્યા
   બોધોઽહમસ્મીતિ તુ બોધમેવ ।
સ્વં વેત્તિ સન્તં ખલુ સર્વ એવ
   વિહાય વૈજ્ઞાનિકવાદમુગ્ધાન્ ॥ ૧૭૫॥

નિત્યોઽવ્યયઃ સન્તતભાનકઃ સ્વઃ
   સર્વાસ્વવસ્થાસ્વપિ સત્ય આસ્તે ।
તસ્મિન્નધિષ્ઠાનસતિ હ્યશેષ-
   મારોપિતં વિશ્વમિદં વિભાતિ ॥ ૧૭૬॥

પૂર્ણસ્ય તસ્યૈવ ચિદાત્મકસ્ય
   સત્યસ્ય સત્તામુપજીવ્ય સદ્વત્ ।

સમાનસં વિશ્વમિદં વિભાતિ
  સ્વાવિદ્યયા મોહિતમાનસાનામ્ ॥ ૧૭૭॥

બ્રહ્મૈકકં સત્ સકલસ્ય જન્તોઃ
  સ્વયં સદૈવાહમહન્તયાઽન્તઃ ।
ભાત્યાત્મરૂપેણ નિ નાન્ય આત્મે-
  ત્યેષાઽસ્તિ વાણી ભગવત્તમસ્ય ॥ ૧૭૮॥

ચૈતન્યમસ્મીતિ મદીયરૂપ-
  મિતિ શ્રુતા મોસસનામકેન ।
યા દેવવાણી પ્રથિતાઽસ્તિ તસ્યા
  ભાવોઽયમેવેત્યપિ સોઽયમૂચે ॥ ૧૭૯॥

વિજ્ઞાય સત્યાત્મતયા તમેવ
  બ્રહ્માત્મકં તુર્યપદે લસન્તમ્ ।
લબ્ધ્વેવ કામાનખિલાન્ સહૈવ
  સદૈવ તૃપ્તા હિ લસન્તિ બુદ્ધા ॥ ૧૮૦॥

સૈષા વિશુદ્ધા ચિતિરાત્મરૂપા
  સ્વાજ્ઞસ્ય વિશ્વાકૃતિકા હિ ભાતિ ।
સત્યાત્મનીત્થં વિપરીતબુદ્ધિ-
  ર્નિજસ્વરૂપાનવબોધમૂલા ॥ ૧૮૧॥

આવિદ્યકં વિશ્વમિદં સદૈવ
  સમાવૃણોત્યેવ હિ તત્સ્વરૂપમ્ ।
ધીરિન્દ્રિયાણ્યપ્યુત માનસં ચ
  ભવન્ત્યવિદ્યાપરિચારકાણિ ॥ ૧૮૨॥

અતઃ પ્રમાણાનિ હિ લૌકિકાનિ
  પ્રત્યક્ષમૈતિહ્યમુતાનુમાનમ્ ।
પ્રતારણાયૈવ ભવન્તિ જન્તો-
  ર્નૈવોપકુર્વન્તિ હિ બોધલબ્ધ્યૈ ॥ ૧૮૩ ॥

અતઃ કિમાશ્ચર્યમિદં યદજ્ઞા
  મત્વા સ્વતઃ સત્યમિમં પ્રપઞ્ચમ્ ।
સંસારિણં ચ પ્રતિયન્તિ પૂર્ણં
  શિવં સદાત્માનમસઙ્ગમેકમ્ ॥ ૧૮૪॥

નિરુક્તમેવં જગતો મૃષાત્વં
  નૈકોપમાનેન સુબોધમસ્તિ ।

અતઃ સ્ફુટીકર્તુમિદં મુમુક્ષો-
સ્તિસ્રો ગુરુર્વક્ત્યુપમાઃ ક્રમેણ ॥ ૧૮૫॥

ભ્રમઃ પ્રપઞ્ચસ્ય સદાત્મરૂપે
રજ્જ્વાં યથાऽહેરિતિ દર્શિતેऽર્થે ।
ઉક્તોપમાયા વિષમત્વબુદ્ધ્યા
શિષ્યસ્ય શઙ્કા સમુદેતિ કાચિત્ ॥ ૧૮૬॥

સર્પભ્રમઃ શામ્યતિ રજ્જુબોધા-
ન્નૈવં જગદ્ ભ્રાન્તિરપૈતિ સાધોઃ ।
શ્રુત્યાऽપિ યુક્ત્યા વિદિતેऽપિ તત્ત્વે
પૂર્વં યથા દૃશ્યત એવ વિશ્વમ્ ॥ ૧૮૭॥

જગદ્ભ્રમો નૈતિ પરોક્ષબોધા-
ન્નિરાસ્પદેયં ખલુ તેન શઙ્કા ।
તથાऽપિ સન્દેહનિવારણાય
ગુરુર્દ્વિતીયામુપમાં બ્રવીતિ ॥ ૧૮૮॥

ભૂયોऽપિ વીક્ષા મૃગતૃષ્ણિકાયા
અસ્ત્યેવ તત્ત્વે વિદિતેऽપિ તસ્યાઃ ।
એવં નિરસ્તેऽપિ ચ સંશયેऽસ્મિ-
ન્નુદેતિ ભૂયોऽપિ ચ સંશયોऽત્ર ॥ ૧૮૯॥

કાર્યોપયોગીનિ હિ જાગતાનિ
વસ્તૂનિ નૈવં તુ મરીચિકામ્ભઃ ।
અત્રોચ્યતે સ્વપ્નસમીક્ષિતાનિ
કાર્યોપયોગીનિ તથાऽપિ મિથ્યા ॥ ૧૯૦॥

કાર્યોપયોગીન્યપિ તદ્વદેવ
મિથ્યૈવ વસ્તૂન્યપિ જાગતાનિ ।
સ્વપ્નો હ્યયં જાગરિતાભિધાનઃ
સ્વાજ્ઞાનનિદ્રાવશગસ્ય જન્તોઃ ॥ ૧૯૧॥

નિદ્રેયમજ્ઞાનમયી ન યાવદ્
વ્યપૈતિ સાધોરપરોક્ષબોધાત્ ।
સ્વપ્નોऽનુવર્તેત હિ જાગરાખ્યો
યસ્મિઞ્જગત્સત્યવદેવ ભાતિ ॥ ૧૯૨॥

જ્ઞેયં હિ સત્યત્વમબાધિતત્વં
બાધ્યત્વમેવાત્ર મૃષાત્વલિઙ્ગમ્ ।

આત્મૈવ સન્નિત્યમબાધિતત્વા-
 ન્મૃષા જગદ્ બાધ્યતયાઽઽત્મબોધે ॥ ૧૯૩ ॥

આત્મન્યધિષ્ઠાનસતિ હ્યશેષ-
 મારોપિતં વિશ્વમિદં વિભાતિ ।
અતો ન વિશ્વં નરશૃઙ્ગતુલ્યં
 સત્યં સ્વતો નેત્યુપદિશ્યતે તુ ॥ ૧૯૪॥

ભેદૈરનન્તૈઃ પ્રવિભક્તમેવ
 પ્રતીયતે વિશ્વમિદં હિ સર્વમ્ ।
ભેદા ઇમે ચાપિ ભવન્તિ મિથ્યે-
 ત્યર્થં ગુરુર્નો વિશદીકરોતિ ॥ ૧૯૫॥

ભેદં ચ જીવેશ્વરયોસ્તથાઽન્યાન્
 પ્રત્યેતિ ભેદાન્ મન એવ સર્વાન્ ।
ભેદપ્રતીતિર્મનસો હિ ધર્મો
 ભાવેઽમનસ્કે ન હિ સન્તિ ભેદાઃ ॥ ૧૯૬॥

મનઃ પ્રતીત્યામકમેવ તસ્મા-
 દજ્ઞાનુભૂતં બત ભેદજાતમ્ ।
સર્વપ્રતીતેર્મનસસ્તુ મૂલં
 ભવત્યનાત્માત્મભિદાપ્રતીતિઃ ॥ ૧૯૭॥

સૈષા શરીરોઽહમિતિ પ્રતીતિઃ
 સંસારવૃક્ષસ્ય નિદાનભૂતા ।
પ્રતીતિરેષા ગદિતાજ્ઞતૈવે-
 ત્યાવિદ્યકા એવ સમસ્તભેદાઃ ॥ ૧૯૮॥

જીવાભિધાનં મન એવ ભેદા-
 નવિદ્યયા કલ્પયતીક્ષતે ચ ।
સુષુપ્તિભાવેઽપિ તુરીયભાવે
 જીવેશ્વરાદ્યા ન હિ સન્તિ ભેદાઃ ॥ ૧૯૯॥

દ્વન્દ્વાનિ સર્વાણ્યપિ ચ ત્રિપુટ્યો
 ભવન્ત્યસત્યાન્યત એવ હેતોઃ ।
સત્યાત્મભાવે ન હિ સન્તિ તાનિ
 ન બાધ્યતે તુર્યપદસ્થ એતૈઃ ॥ ૨૦૦॥

અન્તર્બહિર્જન્મમૃતી સમષ્ટિ-
 વ્ર્યષ્ટિર્જગત્સૃષ્ટિલયૌ તમો ભાઃ ।

આત્માઽપ્યનાત્માઽપ્યુત બન્ધમુક્તી
　　જ્ઞાતાજ્ઞતે જીવ ઉતેશ્વરશ્ચ ॥ ૨૦૧॥

સ્વેચ્છા ચ દૈવં ચ સુખં ચ દુઃખં
　　દોષા ગુણાશ્ચાપ્યુત પુણ્યપાપે ।
ઇત્યાદ્યહઙ્કારનિદાનકત્વાત્
　　સ્વપ્નોપમં વક્તિ ગુરુઃ સમસ્તમ્ ॥ ૨૦૨॥

જ્ઞાતાઽપિ તજ્જ્ઞેયમનાત્મસઞ્જ્ઞં
　　જ્ઞાનં તથા વૈષયિકં તદીયમ્ ।
સમસ્તમેવં ત્રિપુટિપ્રકારં
　　ચાવિદ્યકં સ્વપ્નસમં નિરુક્તમ્ ॥ ૨૦૩॥

આત્મન્યવિદ્યાપરિકલ્પિતૌ દ્વૌ
　　જીવેશ્વરાખ્યૌ ભવતો ન ભિન્નૌ ।
ઉપાધિસમ્બન્ધધિયા ભિદેયં
　　પ્રતીયતે સત્યવદજ્ઞતાયામ્ ॥ ૨૦૪॥

ઈશસ્ય માયા ગદિતાઽસ્ત્યુપાધિ-
　　ર્જીવસ્ય તૂપાધિરબોધ એવ ।
માયાઽસ્ત્યધીના પરમસ્ય તસ્ય
　　જીવસ્ત્વવિદ્યાપરતન્ત્ર એવ ॥ ૨૦૫॥

માયાઽપ્યવિદ્યા ગદિતે તુ શાસ્ત્રે
　　જીવેશયોર્ભેદનિરૂપણાય ।
મિથ્યૈવ ભેદોઽયમબોધમૂલ-
　　સ્તથાઽપિ સત્યો વ્યવહારદૃષ્ટ્યા ॥ ૨૦૬॥

દ્વૈતં ભવેત્ સત્યવદેવ તાવદ્
　　યાવન્ન જીવત્વમપૈતિ બોધાત્ ।
અતો ભવેત્ સત્યવદેવ પુંસાં
　　ભેદો હ્યયં યદ્વદિહાન્યભેદાઃ ॥ ૨૦૭॥

વિશ્વં પરો જીવ ઇતિ ત્રયસ્ય
　　મૃષાત્વમુક્તં હ્યવિભક્તમેવ ।
ન કુક્કુટી કલ્પયિતું હિ શક્યા
　　પાકાય ચાર્ધં પ્રસવાય ચાર્ધમ્ ॥ ૨૦૮॥

સ્વં દેહિનં ચાપ્યુત જીવભૂતં
　　યો મન્યતેઽજ્ઞાતનિજસ્વરૂપઃ ।

આત્મૈવ તસ્મૈ ભજતીશભાવં
તમેવ ભક્ત્યા સ ભજેદ્વિમુક્ત્યૈ ॥ ૨૦૯॥

સત્યાં વિદિત્વાઽદ્વયતાં ધિયૈવ
લબ્ધું સ્વરૂપાનુભવં ત્વશક્તઃ ।
કુર્યાત્ પ્રયત્નં ભવબન્ધમુક્ત્યૈ
ભક્ત્યા પરસ્મિન્નપિ ચ પ્રપત્ત્યા ॥ ૨૧૦॥

ધીરસ્ય પુંસો નિજમાર્ગણં ચ
ભીરોઃ પ્રપત્તિઃ પુરુષે પરસ્મિન્ ।
દ્વાવેવ માર્ગૌ ગદિતૌ મુમુક્ષો-
રન્તર્ભવન્ત્યત્ર સમસ્તમાર્ગાઃ ॥ ૨૧૧॥

અન્વેષયાહઙ્કૃતિમૂલમન્ત-
ર્નાશાય તામર્પય વા પરસ્મૈ ।
માર્ગૌ દ્વિધૈવં ભગવત્તમેન
મુમુક્ષુપુંસાં રમણેન દિષ્ટઃ ॥ ૨૧૨॥

અદ્વૈતિનં સ્વં ગણયન્નધીરો
ભક્તિં પરસ્મિન્નવરાં ચ મત્વા ।
વૃથૈવ જીવત્યભજન્ ય ઈશં
મુગ્ધઃ સ મર્ત્યો મલિનન્તરઙ્ગઃ ॥ ૨૧૩॥

કૂપે યથા રજ્જુનિબદ્ધકુમ્ભો
ભક્તો ભવેઽસ્મિન્ ભવિતા તથૈવ ।
રજ્જું વિના કૂપનિમગ્નકુમ્ભો
યથા તથા ભક્તિવિહીનમર્ત્યઃ ॥ ૨૧૪॥

ય આસુરીં સમ્પદમાશ્રયન્તે
ન ભક્તિરચ્છા ભવિતા હે તેષામ્ ।
દૈવીમતઃ સમ્પદમાશ્રિતઃ સન્
ભક્તિં પરસ્મિન્ વિદધીત સાધુઃ ॥ ૨૧૫॥

લોકપ્રસિદ્ધા પરમસ્ય પુંસઃ
કૃપેતિ શક્તિર્ભવતિ ત્રિરૂપા ।
ઈશસ્વરૂપા ગુરુરૂપિણી ચ
સત્યાત્મરૂપા ચ તુરીયભાવે ॥ ૨૧૬॥

કૃપા તુ સેયં સ્થિતિરેવ તસ્ય
પરસ્ય સત્યાત્મતયા હૃદન્તઃ ।

કૃપા સ્વરૂપં હિ પરસ્ય તસ્ય
    કૃપાં વિના નાસ્તિ હિ તસ્ય સત્તા ॥ ૨૧૭॥

સદૈવ જાગર્તિ કૃપા પરસ્ય
    કાલો ન કોઽપ્યસ્તિ યદા ન સા સ્યાત્ ।
જીવત્યહન્તા તુ નરસ્ય યાવ-
    દપેક્ષતે સા પુરુષસ્ય યત્નમ્ ॥ ૨૧૮॥

ત્યજેન્ન કઞ્ચિત્ કરુણા પરસ્ય
    સર્વાન્ નયેત્ સા હિ વિમુક્તિમેવ ।
મુચ્યન્ત એકે ત્વચિરેણ બન્ધા-
    દન્યે તુ કાલેન ચિરેણ જીવાઃ ॥ ૨૧૯॥

મન્યેત ભક્તઃ સ્વયમેવ ભક્ત્યા
    પરં ભજામીતિ ન તદ્યથાર્થમ્ ।
ધાવન્તમજ્ઞં ભવકાનનેઽસ્મિન્
    પરો હિ ગૃહ્ણાત્યનુધાવ્ય મુગ્ધમ્ ॥ ૨૨૦॥

દયાલુરેવં હિ પુમાન્ પરોઽસૌ
    સ્વમેવ યદ્યચ્છતિ ભક્તિભાજામ્ ।
નાશેઽહમસ્તત્કૃપયા હિ સાધુ-
    સ્તસ્મિન્ન ભેદેન લભેત નિષ્ઠામ્ ॥ ૨૨૧॥

કાન્તાચલોઽસૌ હિ વિકૃષ્ય જીવાન્
    કૃત્વાઽચલાંસ્તાનપિ ભક્ષયિત્વા ।
સ્વસ્મિન્ પદે નિત્યસુખે પરસ્મિન્
    પ્રેમ્ણા સદા રક્ષતિ તુર્યભાવે ॥ ૨૨૨॥

યથાઽર્ણવોત્થામ્બુદવૃષ્ટિજાતા
    ભૂયોઽર્ણવં યાતિ નદી સ્વયોનિમ્ ।
ભ્રાન્ત્વા યથા ખે સુચિરં ચ પક્ષી
    વિશ્રાન્તિમાપ્નોત્યવનિં નિવૃત્ય ॥ ૨૨૩॥

એવં પરસ્માદુદિતોઽપિ જીવો
    ભ્રાન્ત્વા ભવેઽસ્મિન્ સુચિરં કદાચિત્ ।
યથા પ્રવૃત્તો વિનિવૃત્ય ભૂયઃ
    સઙ્ગચ્છતે તં પુરુષં સ્વયોનિમ્ ॥ ૨૨૪॥

ભક્તિઃ પરસ્મિન્ દ્વિવિધોઽપદિષ્ટા
    ચિત્તસ્ય પુંસઃ પરિપાકભેદાત્ ।

આદૌ તુ કીશાર્ભકરીતિભક્તિઃ
   પશ્ચાચ્ચમાર્જારકિશોરભક્તિઃ ॥ ૨૨૫॥

અભ્યસ્ય કીશાર્ભકભક્તિમેવ
   ભવેષ્વનેકેષુ કથઞ્ચિદન્તે ।
ક્ષીણે ત્વહઙ્કારબલે નિતાન્તં
   ભક્તિં બિડાલાર્ભકવત્ કરોતિ ॥ ૨૨૬॥

માર્જારડિમ્ભોપમભક્તિરેવ
   પ્રપત્તિરપ્યાત્મનિવેદનં ચ ।
સેયં વિશુદ્ધા મનસઃ પ્રસાદાત્
   કાલેન બોધેન ભવેત્ સમાના ॥ ૨૨૭॥

પુંસઃ પરસ્મૈ સ્વનિવેદનં તુ
   પુંસા ભવેત્ તેન કૃતં યથાર્થમ્ ।
જાનાતિ યઃ સ્વં નિજમાર્ગણેને-
   ત્યુક્તાઽસ્તિ વાણી ભગવત્તમેન ॥ ૨૨૮॥

પૃથક્ત્વમત્યાઽપ્યપૃથક્ત્વમત્યાઽ-
   પ્યેવં ચ ભક્તિર્ગદિતા દ્વિરૂપા ।
અસંસ્કૃતાનાં પ્રથમોપદિષ્ટા
   સુસંસ્કૃતાનામિતરા પ્રશસ્તા ॥ ૨૨૯॥

તમાત્મભૂતં પૃથગેવ મત્વા
   રૂપેઽપિ નામ્નાઽપિ ચ તં પ્રપૂજ્ય ।
બુદ્ધિપ્રસાદાત્ પરમં ચ ધામ
   કાલેન યાત્યેવ ન તત્ર શઙ્કા ॥ ૨૩૦॥

નામ્નાઽપિ રૂપેણ વિહીનમીશં
   નામ્નાઽપિ રૂપે ભજતે નરશ્ચેત્ ।
સ નામરૂપોદ્ભવબન્ધમુક્તિં
   ભજેદિતિ શ્રીરમણોપદેશઃ ॥ ૨૩૧॥

યામેવ નિષ્ઠાં લભતે મુમુક્ષુ-
   ર્ધ્યાનાદરૂપસ્ય સતઃ પરસ્ય ।
લભેત તામેવ હિ દૈવસમ્પ-
   દ્યુક્તઃ સરૂપં તમુપાસ્ય ભક્ત્યા ॥ ૨૩૨॥

ભજેત્ તમેકં પુરુષં યથેષ્ટં
   કેનાપિ નામ્ના ક્વચનાપિ રૂપે ।

પરસ્ય રૂપેષુ ન તારતમ્યં
    વીક્ષેત ધીમાન્ પરિશુદ્ધચેતાઃ ॥ ૨૩૩॥

એકૈવ મૂર્તિર્બિભિદે ત્રિધા સા
    સામાન્યમેષાં પ્રથમાવરત્વમ્ ।
એવં સ્ફુટં મૂર્તિભિદામૃષાત્વ-
    મૂચે કવીન્દ્રઃ કિલ કાલિદાસઃ ॥ ૨૩૪॥

સર્વોત્તમં રૂપમમુષ્ય બુદ્ધઃ
    સ્વસ્માન્ન યસ્તં સમવૈતિ ભિન્નમ્ ।
પરાત્મશક્તેઃ કરુણાભિધાયા
    રૂપં દ્વિતીયં હિ ગુરુઃ પ્રબુદ્ધઃ ॥ ૨૩૫॥

અહં સ્વયં બુદ્ધ ઇતિ બ્રવીતિ
    ગીતાસુ કૃષ્ણો ભગવાન્ સ્વયં યત્ ।
ઈશાદભિન્નં ગણયેત્ પ્રબુદ્ધં
    શાસ્ત્રોદિતં તત્ત્વમમુષ્ય જાનન્ ॥ ૨૩૬॥

અભ્યર્ચયેદાત્મવિદં મુમુક્ષુ-
    રિત્યસ્તિ વાણી શ્રુતિમસ્તકેષુ ।
મન્વીત ચેદ્ ભિન્નમમું પરસ્માત્
    સા ધીર્મુમુક્ષોઃ પ્રતિહન્તિ માર્ગમ્ ॥ ૨૩૭॥

દેવં ત્વનાત્માનમુપાસતે યે
    તે સામરસ્યેન ભવન્તિ હીનાઃ ।
ચિરેણ કાલેન મતિપ્રસાદા-
    દપૈતિ કેષાઞ્ચન દોષ એષઃ ॥ ૨૩૮॥

યથા મતં સ્વેન પરસ્ય રૂપં
    રૂપં તદેવેક્ષિતુમીહતેઽસૌ ।
કદાચિદીક્ષેત ચ રૂપમેવં
    વીક્ષા ત્વનિત્યેયમતો મૃષૈવ ॥ ૨૩૯॥

સ એવ સાક્ષાત્ પુરુષઃ પરઃ સન્
    સ્વતઃ પૃથક્ તં ગણયન્નબોધાત્ ।
ભક્ત્યા તદીક્ષાં યતતે ચ લબ્ધુ-
    મિતોઽન્યદાશ્ચર્યતરં કિમસ્તિ ॥ ૨૪૦॥

રૂપેક્ષણં રૂપવિવર્જિતસ્ય
    કથં ભવેત્ તસ્ય યથાર્થવીક્ષા ।

તસ્યાત્મનોऽનાત્મવદીક્ષણં ચ
   સત્યેક્ષણં તસ્ય ભવેત્ કથં નુ ॥ ૨૪૧॥

રૂપં સમસ્તં ચ મનોમયં ય-
   દન્તર્ભવેદ્ દ્રષ્ટરિ દૃશ્યરૂપમ્ ।
દ્રષ્ટુઃ સ્વરૂપં હિ ગવેષણીયં
   તદેવ તત્ત્વં હિ પરસ્ય પુંસઃ ॥ ૨૪૨॥

દ્રષ્ટુઃ સ્વરૂપં ય ઉપેક્ષ્ય દેવં
   સ્વતોऽન્યવત્ પશ્યતિ ભક્તિયોગાત્ ।
સ વીક્ષતે માનસરૂપમેવે-
   ત્યેષાऽસ્તિ વાણી ભગવત્તમસ્ય ॥ ૨૪૩ ॥

દ્રષ્ટુઃ સ્વરૂપસ્ય ગવેષણેન
   દ્રષ્ટુર્વિનાશાત્ પરિશિષ્યતે યત્ ।
તદેકમેવ સ્વયમાત્મરૂપં
   રૂપં ચ સત્યં પરમસ્ય પુંસઃ ॥ ૨૪૪॥

જીવાભિધં યત્ર મનો નિગીર્ણં
   તેનાન્નવદ્યાતિ તદાત્મભાવમ્ ।
સૈવાત્મવીક્ષાऽપિ પરસ્ય વીક્ષે-
   ત્યેષા ગુરોઃ શ્રીરમણસ્ય વાણી ॥ ૨૪૫॥

ઉપાસનં સ્વાત્મતયૈવ તસ્ય
   શ્રુતેર્વચોભિર્વિહિતં મુમુક્ષોઃ ।
મત્વા સ્વતોऽન્યં તમુપાસતે યે
   શ્રુતિઃ પશૂંસ્તાન્ બત વક્તિ પુંસઃ ॥ ૨૪૬॥

હિત્વાऽऽત્મદેવં ભજતે સ્વતોऽન્યં
   ય એષ હસ્તસ્થિતકૌસ્તુભં સઃ ।
અપાસ્ય રત્નં વિચિનોતિ કિઞ્ચિ-
   દિત્યેવમૂચે ભગવાન્ વસિષ્ઠઃ ॥ ૨૪૭॥

વપુષ્યહન્તૈવ હિ પાપમાદ્યં
   નિરૂપિતં યદ્ ભગવત્તમેન ।
પાપાદમુષ્માદુદિતા પરસ્ય
   સ્વતોऽન્યતાધીરપિ પાપમેવ ॥ ૨૪૮॥

પૂર્ણત્વમુક્તં શ્રુતિભિઃ પરસ્ય
   સત્યં ભવત્યાત્મતયૈવ તસ્ય ।
તત્પૂર્ણતાયા બત ભઙ્ગ એવ

પૃથક્ત્વમત્યા ક્રિયતે હિ મૂઢૈઃ ॥ ૨૪૯॥

અભેદમત્યા રચિતા તુ ભક્તિ-
સ્તત્પૂર્ણતાઙ્ગીકરણસ્ય રીતિઃ ।
સુભક્તિમેતામતિપાવનીં ચ
બ્રૂતે મુમુક્ષોર્ભગવાન્ ગુરુર્નઃ ॥ ૨૫૦॥

પ્રદીપમાદાય તમોઽનુધાવન્
નરો યથા તદ્વદુપાસકોઽપિ ।
પૃથક્ત્વયોપાસ્ય પરં ન યાતી-
ત્યેવં ચ દિષ્ટં ભગવત્તમેન ॥ ૨૫૧॥

ભિદાહમન્તારચિતાં મૃષેતિ
બુદ્ધ્વા ભજત્યાત્મતયા યદીશમ્ ।
અતો મુમુક્ષોરનયૈવ ભક્ત્યા
સિદ્ધ્યેદહન્તાનિધનં જવેન ॥ ૨૫૨॥

સ્વતોઽન્યમીશં બત મન્યતે યો
મૃષૈવ તેનાત્મસમર્પણં હિ ।
મૃષૈવ ચોલેષુ યથા વિવાહે
સ્યાન્નારિકેલસ્ય ફલસ્ય દાનમ્ ॥ ૨૫૩ ॥

અનાત્મતાયાં પરમસ્ય પુંસઃ
પ્રેષ્ઠેતરત્વં બત તસ્ય સિદ્ધમ્ ।
આત્મૈવ હિ પ્રેષ્ઠ ઇતિ પ્રસિદ્ધઃ
શ્રુત્યાઽનુભૂત્યાઽપિ હિ સર્વજન્તોઃ ॥ ૨૫૪॥

પરં પ્રપદ્યેત વિહાય ધર્મા-
નારોપિતાનાત્મનિ જીવતાદ્યાન્ ।
અવોચદેવં ભગવાન્ ગુરુર્નો
ગીતાન્તિમશ્લોકનિગૂઢમર્થમ્ ॥ ૨૫૫॥

પુંસે પરસ્મૈ સ્વનિવેદનં યત્
સા ભક્તિયોગસ્ય પરા હિ નિષ્ઠા ।
ક્ષીણે ત્વહઙ્કારબલે તદેતદ્
વિશુદ્ધચિત્તેન ભવેત્ તુ સાધ્યમ્ ॥ ૨૫૬॥

લઘ્વી યથા કાન્તશિલા મહત્યા
વિભિન્નકોટ્યાશ્રયણાત્ તથૈવ ।
જીવોઽલ્પકો મસ્તકપાદયોગા-

દૈક્યં ભજેત્ તેન પરેણ પુંસા ॥ ૨૫૭॥

ઇષ્ટં યથા તે ભવતાત્ તથૈવ
સર્વાત્મનાઽહં ત્વદધીન એવ ।
એવં ધિયા તિષ્ઠતિ યઃ સદૈવ
તેનાર્પણં સ્વસ્ય ભવેદ્યથાર્થમ્ ॥ ૨૫૮॥

ભૂભારવોઢા સ ઇતિ પ્રપન્ન-
સ્તસ્મિન્ ભરં ન્યસ્ય ભજેત્ પ્રશાન્તિમ્ ।
વહન્ સ્વયં ગોપુરધારિબિમ્બો
યથા તથા સ્યાત્ પરિહાસપાત્રમ્ ॥ ૨૫૯॥

યાને યથા સ્વીયભરં નિવેશ્ય
કરોતિ યાત્રામુપવિશ્ય તત્ર ।
એવં પરસ્મિન્ સ્વભરં નિવેશ્ય
સમાપયેત્ સ્વામિહ લોકયાત્રામ્ ॥ ૨૬૦॥

યથા નિજાં દેહકુટુમ્બચિન્તાં
ત્યજેદ્ભરં ન્યસ્ય બુધઃ પરસ્મિન્ ।
ત્યજેત્તથા લોકહિતાર્થચિન્તાં
તસ્મિન્ સમસ્તં ચ ભરં નિવેશ્ય ॥ ૨૬૧॥

અનિષ્ટમિષ્ટં ચ સુખં ચ દુઃખં
કાલોપનીતં સહમાન એવ ।
શોકં મુદં ચાપ્યભજન્ સુભક્તઃ
કાલં નયેત્ તત્પરવાધિયૈવ ॥ ૨૬૨॥

યદા નિગીર્ણા કૃપયા પરસ્ય
નશ્યેદહન્તા સહજાત્મભાવે ।
નિવેદનં સ્વસ્ય તદા પરસ્મૈ
સત્યં ચ પૂર્ણં ચ ભવેદ્ધિ સાધોઃ ॥ ૨૬૩ ॥

ગણેશમૂર્તેર્ગુડનિર્મિતસ્ય
યથાઽંશમાદાય નિવેદનં સ્યાત્ ।
તથા પરસ્મૈ સ્વનિવેદનં સ્યાત્
સ્વો નામ તસ્માન્ન હિ કશ્ચિદન્યઃ ॥ ૨૬૪॥

આત્મા સ્વયં યત્ પરમઃ સ એવ
નિવેદનં કેન કથં ચ કસ્મૈ ।
યેનાહમા ભેદમવૈતિ તસ્માત્

तन्नाश એવાત્મનિવેદનં હિ ॥ ૨૬૫॥

પુંસે પરસ્મૈ યદિ દિત્સસિ સ્વ-
મન્વિષ્ય પૂર્વં સ્વમવેહિ સાક્ષાત્ ।
એવં સ્વદાનં કૃતમેવ તસ્મા
ઇત્યસ્તિ વાણી ભગવત્તમસ્ય ॥ ૨૬૬॥

અહઙ્કૃતેરેવ નિતાન્તહાનં
નમસ્કૃતેસ્તત્ત્વમુદીર્યતે ચ ।
જ્ઞાનં પ્રપત્તિશ્ચ નમસ્કૃતિશ્ચે-
ત્યેતત્ ત્રયં તત્ત્વત એકમેવ ॥ ૨૬૭॥

યથા ન વીક્ષાવિષયઃ પરાત્મા
બોધસ્ય તદ્વદ્વિષયો ન સોઽયમ્ ।
અગોચરત્વાન્મનસઃ પરસ્ય
વિદ્યાન્મનસ્તં હ્યયથાવદેવ ॥ ૨૬૮॥

ચિદ્રૂપ આત્મૈવ હિ સન્ પરો ય-
ન્નૈવાસ્તિ ચિત્ કાચન તદ્વિભિન્ના ।
જ્ઞાતા ન તસ્યાસ્તિ હિ કશ્ચિદન્યો
જ્ઞાનસ્ય નાસૌ વિષયો હિ તસ્માત્ ॥ ૨૬૯॥

ચૈતન્યદીપ્તિર્મનસો ભવેદ્યા
તસ્યા નિદાનં સ હિ સત્ય આત્મા ।
અતો વિભિન્નં ભવિતા ન તસ્માત્
કિઞ્ચિન્મનોનામકમત્ર સત્યમ્ ॥ ૨૭૦॥

ચૈતન્યમાત્માકૃતિકં હૃદન્ત-
ર્ભાસા સ્વયા ભાસ્કરવદ્વિભાતિ ।
ભાસાઽઽત્મનસ્તસ્ય શશાઙ્કવત્તુ
જડં મનશ્ચેતનવદ્વિભાતિ ॥ ૨૭૧॥

ચિતિસ્વભાવં ન મનોઽસ્તિ યસ્માત્
તતો મનો યાતિ લયં સુષુપ્તૌ ।
ચિતિસ્વભાવઃ ખલુ સત્ય આત્મા
ન યાત્યસૌ તેન લયં કદાઽપિ ॥ ૨૭૨॥

નિમીલયત્યેવ મનો હિ નિત્યં
સ્વપ્નેઽપિ જાગ્રત્યપિ તત્સ્વરૂપમ્ ।
લીનં સુષુપ્તૌ ચ મૃતં તુરીયે

મનો વિબુધ્યેત કથં તમેકમ્ ॥ ૨૭૩ ॥

સ્વમૂલમન્વિષ્ય મનઃ પરસ્મિન્
યાત્યેકતાં યત્ સહજાત્મભાવે ।
સ એવ સત્યઃ પરમસ્ય બોધ
ઇત્યસ્તિ વાણી ભગવત્તમસ્ય ॥ ૨૭૪॥

ભિન્નૌ ભવેતાં ન હિ તત્ત્વદૃષ્ટ્યા
જીવેશ્વરૌ દ્વાવિતિ નિશ્ચયેન ।
ભક્ત્યાઽથવા સ્વાત્મગવેષયોગાત્
તસ્મિન્નભેદેન લભેત નિષ્ઠામ્ ॥ ૨૭૫॥

જ્ઞાનાજ્ઞતે ભિન્નપદેઽજ્ઞતે દ્વે
સાંસારિકે સ્વાજ્ઞજનાનુભૂતે ।
દ્વાભ્યાં વિમુક્તો ભવતિ પ્રબુદ્ધો
દ્વન્દ્વં મૃષેદં ખલુ યદ્વદન્યત્ ॥ ૨૭૬॥

ઉભેઽપિ ચૈતે ભવતઃ સહૈવ
નૈકં વિનાઽન્યેન ભવેત્ કદાઽપિ ।
સ્વાજ્ઞાનમૂલં દ્વયમિત્યતશ્ચા-
પ્યજ્ઞાનમેવ દ્વિતયં સમાનમ્ ॥ ૨૭૭॥

જ્ઞાતૃસ્વરૂપાવગતિં વિનૈવ
જ્ઞાતું સ્વતોઽન્યદ્યતતે હિ સર્વઃ ।
અજ્ઞાનજં જ્ઞાનમિદં હિ તસ્મા-
દજ્ઞાનમેવેતિ ગુરૂપદેશઃ ॥ ૨૭૮॥

જ્ઞાતાઽહમસ્મીત્યુદિયાદ્ય એષ
તદીયતત્ત્વાવગતિં વિનૈવ ।
યદ્યદ્વિજાનાતિ ધિયેન્દ્રિયૈર્વા
તત્તદ્વિજાનાત્યયથાવદેવ ॥ ૨૭૯॥

અવિદ્યમાનં બત વિશ્વમેતત્
સદ્વદ્વિજાનાતિ હિ બોધહીનઃ ।
અલૌકિકં ચાપિ નિજં સ્વરૂપં
જાનાતિ લોકે બત જીવભૂતમ્ ॥ ૨૮૦॥

ધીરિન્દ્રિયાણ્યપ્યપિ માનસં ચ
ભવન્ત્યવિદ્યાપરિચારકાણિ ।
અતઃ પ્રમાણાનિ હિ લૌકિકાનિ

સમ્મોહનાયૈવ ભવન્તિ જન્તોઃ ॥ ૨૮૧॥

જ્ઞાતાજ્ઞતે દ્વે ભવતોઽનુભૂતે
યેનાહમા તસ્ય કુતો નુ જન્મ ।
ઇતિ સ્વતત્ત્વસ્ય ગવેષણેન
નષ્ટેઽહમાખ્યે દ્વિતયં ચ નશ્યેત્ ॥ ૨૮૨॥

જ્ઞાનં યથાર્થં ત્વહમો વિનાશો
નિજસ્વરૂપે સહજા સ્થિતિર્હિ ।
શિષ્ટે ન તસ્યાં ભવતોઽજ્ઞતે દ્વે
સાંસારિકે દ્વૈતવિવર્જિતાયામ્ ॥ ૨૮૩ ॥

તાં જ્ઞાનનિષ્ઠાં નિગદન્તિ બુદ્ધા
જ્ઞાનાજ્ઞતે દ્વે ભવતો ન યસ્યામ્ ।
નિષ્ઠા પરા સા વિદુષો હિ યસ્યાં
નાસ્તિ સ્વતોઽન્યચ્ચિદચિત્સ્વરૂપમ્ ॥ ૨૮૪॥

અપણ્ડિતઃ પણ્ડિત આત્મવિચ્ચ
ત્રયોઽપિ ચાજ્ઞા હિ સમાનમેવ ।
અજ્ઞસ્તૃતીયોઽપિ યતો ન તસ્ય
સ્વસ્માત્ પૃથક્કિઞ્ચન વેદ્યમસ્તિ ॥ ૨૮૫॥

નિષ્ઠાં ગતોઽસૌ નિજધામ્નિ સત્યે
વન્દ્યઃ સમસ્તૈર્મનુજૈઃ સુરૈશ્ચ ।
પુંસઃ પરસ્માદપૃથક્તયાઽસૌ
મુમુક્ષુપુંસાં ભજનીય એવ ॥ ૨૮૬॥

અજ્ઞાનમન્તં ભજતાં તુરીયે
નશ્યેત્ કુતો જ્ઞાનમુતેતિ કેચિત્ ।
પૃચ્છન્ત્યબોધાત્મકતામબુદ્ધ્વા
જ્ઞાનાભિધસ્યાસ્ય હિ લૌકિકસ્ય ॥ ૨૮૭॥

નૈવાસ્તિ બોધ્યં ન ચ કોઽપિ બોદ્ધા
ન ચાસ્તિ બોધોઽપિ તુરીયભાવે ।
દ્વન્દ્વાનિ યદ્વન્ન ભવન્તિ તુર્યે
તથા ત્રિપુટ્યોઽપિ ન તત્ર સન્તિ ॥ ૨૮૮॥

એકઃ સ આત્મૈવ હિ તુર્યભાવે
જ્ઞાનાજ્ઞતાભ્યાં રહિતશ્ચકાસ્તિ ।
જ્ઞાનસ્વરૂપઃ સ્વયમવ્યયો ય-
ચ્છૂન્યં કથં તત્ પરમં પદં સ્યાત્ ॥ ૨૮૯॥

ચૈતન્યભાસા નિજયૈવ તસ્મિન્
ભાત્યાત્મરૂપં શિવમદ્વિતીયમ્ ।
ન ભાસકં તસ્ય ન તેન ભાસ્યં
સત્યં કિમપ્યસ્તિ તુરીયભાવે ॥ ૨૯૦॥

નોદેતિ નાપ્યસ્તમુદેતિ તસ્ય
ચૈતન્યદીપ્તિઃ સતતૈકરૂપા ।
આદાય તસ્યૈવ ચિદંશલેશં
પ્રતીયતે ચેતનવન્મનો હિ ॥ ૨૯૧॥

મત્વાઽઽત્મનાશસ્ય પદં તુરીયં
બિભ્યત્યમુષ્માદવિવેકિનો યે ।
વાઞ્છન્તિ તે નિત્યસુખાય ગન્તું
લોકાન્તરં દિવ્યમબુદ્ધશિષ્યાઃ ॥ ૨૯૨॥

લોકો યથાઽયં ભવિતા મૃષૈવ
તથૈવ લોકા અનૃતાઃ પરે ચ ।
આત્મૈવ લોકઃ ખલુ બુદ્ધપુંસઃ
સ એવ તસ્માદ્ ગદિતઃ સ્વયં સન્ ॥ ૨૯૩ ॥

કિં નો ધનેન પ્રજયાઽપિ યેષાં
આત્મૈવ લોકો ભવતીતિ બુદ્ધાઃ ।
નાપિ પ્રવૃત્તિં ન ચ વા નિવૃત્તિં
વાઞ્છન્તિ સંશાન્તસમસ્તકામાઃ ॥ ૨૯૪॥

એકઃ સ બોધાત્મક એવ સત્યો
બોધઃ પ્રપઞ્ચાકૃતિરજ્ઞતૈવ ।
બોધાત્ પ્રપઞ્ચાકૃતિકાત્ પ્રપઞ્ચો
ભિન્નો યતો નાસ્ત્યત એવ મિથ્યા ॥ ૨૯૫॥

અજ્ઞાનમેતત્ તમસા સમાનં
ન શક્યમસ્તીતિ તુ વક્તુમેતત્ ।
તમો ન યદ્વત્ સહતે પ્રકાશ-
મજ્ઞાનમેવં સહતે ન બોધમ્ ॥ ૨૯૬॥

પ્રતીયતેઽજ્ઞાનમિદં પરસ્મિન્
પ્રપઞ્ચરૂપં સદિવાજ્ઞમર્ત્યૈઃ ।
સત્યે સુવર્ણે રુચકાન્યસન્તિ

सद्वत् प्रतीतानि यथा भवन्ति ॥ २९७॥

સત્યં સુવર્ણં રુચકાન્યસન્તી-
ત્યેતત્ કથં સ્યાદિતિ ચેદ્ ગુરોર્નઃ ।
દાર્ષ્ટાન્તિકં વિશ્વમિદં મૃષેતિ
સન્દર્શનાયાત્ર પદપ્રયોગઃ ॥ ૨૯૮॥

દાર્ષ્ટાન્તિકસ્ય સ્ફુટબોધનાય
સર્વોઽપિ દૃષ્ટાન્ત ઉદીર્યતે યત્ ।
વિવક્ષિતાર્થાવગતિર્યથા સ્યાત્
તથૈવ દૃષ્ટાન્તનિવેદનાનિ ॥ ૨૯૯॥

સુવર્ણમાસન્ રુચકાનિ પૂર્વં
તદેવ મધ્યેઽપિ તદેવ ચાન્તે ।
સત્યં સુવર્ણં રુચકાન્યપેક્ષ્ય
વિનશ્વરત્વાદ્રુચકાનિ મિથ્યા ॥ ૩૦૦॥

અનિત્યતૈવાત્ર મૃષાત્વલિઙ્ગં
સત્યત્વમુક્તં ખલુ નિત્યતૈવ ।
અતોઽજ્ઞતા તજ્જમિદં ચ વિશ્વં
રજ્જ્વામહિર્યદ્વદસત્યમેવ ॥ ૩૦૧॥

પટે પ્રકાશેન યુતે યથા વા
મૃષૈવ ચિત્રાણ્યચલે ચલન્તિ ।
તદ્વજ્જગચ્ચિત્રતતિશ્ચ સેય-
માયાતિ સંયાતિ મૃષૈવ સત્યે ॥ ૩૦૨॥

દ્રષ્ટા ચલચ્ચિત્રતતેર્વિભિન્નો
દ્રષ્ટા જગચ્ચિત્રતતાવભિન્નઃ ।
વિશેષ એવં જગતોઽસ્તિ યસ્માત્
સદ્રષ્ટૃકસ્યાસ્ય મૃષાત્વસિદ્ધિઃ ॥ ૩૦૩॥

યથા ચલચ્ચિત્રતતેર્વિરામે
પટપ્રકાશોઽસ્તિ વિશુદ્ધ એવમ્ ।
મૃષા જગચ્ચિત્રતતેર્વિરામે
શિષ્યેત શુદ્ધા ચિતિરાત્મરૂપા ॥ ૩૦૪॥

પ્રતિક્ષણં નૂતનમેવ ચિત્રં
વીક્ષ્યાપિ સર્વં મનુતે યથૈકમ્ ।
તથૈકમજ્ઞો મનુતે હિ વીક્ષ્ય

પ્રતિક્ષણં નૂતનમેવ વિશ્વમ્ ॥ ૩૦૫॥

આધારવસ્ત્રેઽપિ તદીયભાસા
યથા ચલચ્ચિત્રતતિર્વિભાતિ ।
એવં પ્રપઞ્ચોઽપિ સદાત્મરૂપે
તદીયસંવિત્પ્રભયૈવ ભાતિ ॥ ૩૦૬॥

આત્મા સ્વતઃ સન્નત એવ હેતો-
ર્નૈવ સ્વતઃ સત્યમિદં હિ વિશ્વમ્ ।
વિજ્ઞેયમેવં જગતો મૃષાત્વં
સત્તાઽઽત્મનશ્ચાપિ ચિદાત્મકસ્ય ॥ ૩૦૭॥

દેશેન કાલેન વિભક્તમેવ
સ્વપ્ને મનો જાગરિતે સમાનમ્ ।
અવૈતિ દેહાદિસમસ્તદૃશ્ય-
મતો વિચાર્યાઽસ્ત્યનયોશ્ચ સત્તા ॥ ૩૦૮॥

ત્રયં મનોમાત્રમિદં પ્રદિષ્ટં
દેશોઽપિ કાલોઽપિ નિમિત્તયોગઃ ।
પાશ્ચાત્યદેશીયવિપશ્ચિતાઽસ્તિ
કાન્તાભિધાનેન સુયુક્તિવાદૈઃ ॥ ૩૦૯॥

સર્વાનુભૂત્યાઽપિ સુષુપ્તિભાવે
બુદ્ધાનુભૂત્યાઽપિ તુરીયભાવે ।
મૃષાત્વમેતત્ પ્રકટીકરોતિ
સ્ફુટં મુમુક્ષોર્ભગવાન્ ગુરુર્નઃ ॥ ૩૧૦॥

સુષુપ્તિભાવે મનસિ પ્રલીને
તુરીયભાવે મનસિ પ્રણષ્ટે ।
ન કોઽપિ જાનાતિ હિ દેશકાલૌ
મનોમયં તદ્વિતયં હિ તસ્માત્ ॥ ૩૧૧॥

મનઃ સવિશ્વં સૃજતિ દ્વયં ચ
સ્વપ્ને યથા જાગરિતે તથૈવ ।
તાભ્યાં વિના વેત્તિ મનો ન કિઞ્ચિ-
દેષ સ્વભાવો મનસો હિ નિત્યઃ ॥ ૩૧૨॥

દેહોઽહમિત્યજ્ઞતયૈવ મર્ત્યો
દેશેઽપિ કાલેઽસ્મ્યહમિત્યવૈતિ ।
દેશે ભવામો ન હિ નાપિ કાલે

देहा वयं चेदुभयोर्भवेम ॥ ३१३॥

દેહા વયં નો ન ચ દેહિનો વા
જીવા વયં નૈવ કદાઽપ્યભૂમ ।
અસ્માસુ તૌ દ્વૌ મનસોપક્લૃપ્તૌ
હ્યવિદ્યયા યદ્વદિદં સમસ્તમ્ ॥ ૩૧૪॥

મનોઽહમો જન્મભુવં વિમૃગ્ય
લભેત શાન્તિં યદિ તુર્યભાવે ।
તદા નિગીર્યેત સદાત્મનૈવ
સહાહમા તદ્વિતયં સવિશ્વમ્ ॥ ૩૧૫॥

માયામયં કારણકાર્યરૂપં
સદેશકાલં બત વિશ્વમેતત્ ।
ન વિક્રિયામેતિ કદાચિદાત્મા
દેશેન કાલેન નિમિત્તતો વા ॥ ૩૧૬॥

સદૈકધૈવાચ્યુત એક આત્મા
કાલાતિગો દેશવિવર્જિતશ્ચ ।
પૂર્ણઃ પ્રબુદ્ધૈરનુભૂયતે યત્
સ એવ સત્યો ન તુ કિઞ્ચિદન્યત્ ॥ ૩૧૭॥

ભૂતોઽપિ ભાવી ચ ભવન્નિતીમે
કાલસ્ય ભેદા અપિ નૈવ સત્યાઃ ।
ભૂતોઽપિ ભાવી ભવદાશ્રયૌ ચ
ભવન્ સ્વકાલે ભવતો હ્યુભૌ ચ ॥ ૩૧૮॥

અતો ભવન્નેવ સમસ્તકાલો
વાચૈવ કુર્વન્તિ વિભાગમેવમ્ ।
આત્મસ્વરૂપં ખલુ નિત્યસત્ય-
મતો ભવન્નામ તદેવ નાન્યત્ ॥ ૩૧૯॥

ઇચ્છેદતસ્તત્ત્વમમુષ્ય બોદ્ધું
તુરીયભાવાધિગમેન સાધુઃ ।
ચર્ચેહ ભૂતસ્ય ચ ભાવિનોઽપિ
વિનૈકસઙ્ખ્યાં ગણનેતિ દિષ્ટા ॥ ૩૨૦॥

અસ્ત્યેકસઙ્ખ્યૈવ ન કાચિદન્યા
સઙ્ખ્યાઃ સમસ્તાશ્ચ તદાત્મિકા હિ ,
અસ્ત્યેવમાત્માકૃતિકા ચિદેવ

તદાત્મકં સર્વમિદં ચ વિશ્વમ્ ॥ ૩૨૧॥

યથૈકસઙ્ખ્યામવગમ્ય સમ્યક્
સઙ્ખ્યાં સમસ્તામવગન્તુમીષ્ટે ।
જ્ઞાત્વૈવમેકં નિજતત્ત્વમેવ
જાનન્તિ બુદ્ધા જગતોઽપિ તત્ત્વમ્ ॥ ૩૨૨॥

બોધઃ સ્વતોઽન્યસ્ય વિના સ્વબોધ-
મબોધ એવેતિ ગુરુર્બ્રવીતિ ।
સ્વસ્મિન્નબુદ્ધે સતિ વેત્તિ યદ્યત્
તત્તદ્વિજાનાત્યયથાવદેવ ॥ ૩૨૩ ॥

સ્વસ્મિન્ વિબુદ્ધે નિજમાર્ગણેન
બોદ્ધું સ્વતોઽન્યન્ન હિ કિઞ્ચિદસ્તિ ।
બુદ્ધસ્ય ભાત્યાત્મતયૈવ સર્વ-
માત્મા તતઃ સર્વ ઇતિ પ્રસિદ્ધઃ ॥ ૩૨૪॥

સત્યાત્મભાવે સ્થિતિમેવ તસ્માત્
સર્વજ્ઞતાં શ્રીરમણો બ્રવીતિ ।
સર્વજ્ઞતાં યાં ગણયન્ત્યબુદ્ધાઃ
સૈષાજ્ઞતૈવેત્યપિ વક્તિ સોઽયમ્ ॥ ૩૨૫॥

નેદં શરીરાત્ પૃથગસ્તિ વિશ્વં
નેદં શરીરં મનસોઽસ્તિ ભિન્નમ્ ।
સત્યાત્મનો નાસ્તિ મનો વિભિન્ન-
માત્મૈવ તસ્માદખિલં ચ વિશ્વમ્ ॥ ૩૨૬॥

અહં પુરા જન્મનિ કીદૃગાસ-
મિતઃ પરં ચાપિ કથં ભવેયમ્ ।
ઈદૃગ્વિચારા બત મુગ્ધતૈવ
ન જન્મ લેભે હિ કદાચિદાત્મા ॥ ૩૨૭॥

વ્યષ્ટેઃ સમષ્ટેરપિ ચિન્તનાનિ
નિરર્થકાન્યેવ મુમુક્ષુપુંસામ્ ।
ચિન્તાઃ સમસ્તાઃ પ્રભવન્તિ યસ્ય
તન્મૂલચિન્તૈવ હિ મુક્તિદાત્રી ॥ ૩૨૮॥

પ્રશ્નાઃ ક્રિયન્તેઽત્ર મુધૈવ મર્ત્યૈઃ
સૃષ્ટં જગત્ કેન કથં ચ પૂર્વમ્ ।
કા નામ માયા કથમાઽપ્યવિદ્યા

कथं न्वभूज्जीव इति प्रमादात् ॥ ३२९॥

દૃષ્ટેર્ન સૃષ્ટિઃ પૃથગસ્તિ કાચિદ્
દૃષ્ટિશ્ચ સૃષ્ટિર્દ્વયમેકમેવ ।
સા દૃષ્ટિરજ્ઞાનમયીતિ હેતો-
સ્તસ્યાઃ પ્રહાણં નિધનં હિ સત્યમ્ ॥ ૩૩૦॥

માયાભિધાના પરશક્તિરેવ
મનસ્સુ બુદ્ધીન્દ્રિયબોધરૂપમ્ ।
વિચિત્રમેતં સૃજતિ પ્રપઞ્ચં
સ સત્યવદ્ ગૃહ્યત એવ મુગ્ધૈઃ ॥ ૩૩૧॥

સદ્વિચારેણ મૃષાત્મકસ્ય
સત્યાત્ પ્રમાદો ભવિતા ધ્રુવં હિ ।
ન ચ પ્રમાદાદપરોઽસ્તિ મૃત્યુઃ
સ્વો નષ્ટકલ્પોઽસ્તિ હિ તેન સાધોઃ ॥ ૩૩૨॥

અસ્મિન્નવેદીદ્યદિ જન્મનિ સ્વં
તદૈવ સત્યં પુરુષસ્ય સત્યમ્ ।
ન ચેદવેદીદિહ જન્મનિ સ્વં
તસ્યાવૃતં સ્યાદનૃતેન સત્યમ્ ॥ ૩૩૩॥

તદ્દેશકાલવનૃતૌ વિદિત્વા
વિહાય વિશ્વં ચ સમસ્તમેવ ।
ઇચ્છેદધિષ્ઠાનસદેવ બોદ્ધું
સ્વાત્મસ્વરૂપં નિજમાર્ગણેન ॥ ૩૩૪॥

કર્તાઽસ્મ્યહં કર્મફલસ્ય ભોક્તે-
ત્યેવં નરો યો મનુતે સ એવ ।
ધીદૈવયોર્ભેદમવૈતિ સત્યં
કર્તાઽપિ ભોક્તા ન તુ સત્ય આત્મા ॥ ૩૩૫॥

ઇષ્ટં યદા કર્મફલં તદાનીં
બલીયસીં બુદ્ધિમવૈતિ દૈવાત્ ।
યદ્યન્યથા કર્મફલં ભવેત્તુ
દૈવં બલીયો મનુતે તદાનીમ્ ॥ ૩૩૬॥

દૈવં ભવેત્ પૂર્વકૃતં હિ કર્મ
ધિયા કૃતં કર્મ સમસ્તમેવ ।
ધીદૈવયોર્દ્વન્દ્વમતો મૃષૈવ

તયોર્વિરોધઃ કથમસ્તુ સત્યઃ ॥ ૩૩૭॥

ધીદૈવયોર્મૂલમહઙ્કૃતિર્યત્
સ્વાન્વેષણાત્ સા યદિ નાશમીયાત્ ।
ધીદૈવયોર્દ્વન્દ્વમિદં વિનશ્યે-
ન્ન વેત્તિ ધીદૈવભિદં પ્રબુદ્ધઃ ॥ ૩૩૮॥

બુદ્ધોઽમનસ્કો ગલિતાભિમાનઃ
સઙ્કલ્પશૂન્યોઽપિ ભવેન્ન કર્તા ।
ભોક્તાઽપિ નાસૌ ભવિતા કદાઽપિ
ન વેત્તિ ધીદૈવભિદામતોઽસૌ ॥ ૩૩૯॥

સ્વોઽબુદ્ધમર્ત્યસ્ય ચ નિત્યબુદ્ધો
ન સજ્જતે કર્મસુ નૈતિ મોહમ્ ।
તત્સન્નિધાનેન તુ લબ્ધસઞ્જ્ઞા
પ્રવર્તતે ધીઃ સ્વગુણાનુરૂપમ્ ॥ ૩૪૦ „
ચિન્તામતો દૈવધિયોર્વિહાય
સાંસારિકીં ચાપિ સમસ્તચિન્તામ્ ।
બ્રહ્માત્મકં કેવલમાત્મતત્ત્વં
યતેત બોદ્ધું નિજમાર્ગણેન ॥ ૩૪૧॥

જીવાભિધાનો જગદીક્ષકો ય-
સ્તસ્મિન્નિગૂઢં જગતોઽસ્ય તત્ત્વમ્ ।
ઉદેત્યયં ચેદુદિયાચ્ચ વિશ્વં
લીયેત વિશ્વં લયમેત્યયં ચેત્ ॥ ૩૪૨॥

તત્તત્ત્વમસ્યૈવ નિજાનુભૂત્યા
જાનન્ પ્રબુદ્ધઃ સમવૈતિ વિશ્વમ્ ।
અન્યે તુ દેહાત્મધિયાઽભિભૂતા
વિશ્વં વિજાનન્ત્યયથાવદેવ ॥ ૩૪૩ ॥

જીવોઽજ્ઞતાયાઃ પ્રથમં સ્વરૂપં
જીવોઽઙ્કુરઃ સંસૃતિદુર્દ્રુમસ્ય ।
વિભૂતિરસ્યૈવ જગત્ સમસ્તં
નાશોઽન્તતશ્ચાસ્ય વિમુક્તિ ભાવઃ ॥ ૩૪૪॥

તમેનમર્થં સુગતો ગુરુશ્ચા-
પ્યૂચે તથા શઙ્કરદેશિકેન્દ્રઃ ।
બ્રૂતેઽપિ ચાસ્મદ્ગુરુરર્થમેનં

વેદાન્તસારોઽપ્યયમર્થ એવ ॥ ૩૪૫॥

વિશ્વં સ્વદૃશ્યં ન વિના કદાઽપિ
દ્રષ્ટાઽસ્ય જીવો ભવતિ પ્રતીતઃ ।
જીવો ન કોઽપ્યસ્તિ સુષુપ્તિભાવે
મનોમનોઽયં હિ યથાઽસ્ય દૃશ્યમ્ ॥ ૩૪૬॥

સહૈવ દેહેન ભવેત્ પ્રતીતો
જીવાભિધોઽયં ખલુ સર્વદાઽપિ ।
મૃતૌ ચ દેહસ્ય ન પૂર્વદેહં
જહાત્યનાદાય હિ દેહમન્યમ્ ॥ ૩૪૭ ।
જીવોઽયમેવં વપુષોઽપૃથક્ત્વા-
દન્તર્ભવત્યેવ જગત્સ્વરૂપે ।
નિત્યત્વમસ્યૈવ તુ કલ્પયન્તિ
શિષ્યા અબુદ્ધસ્ય ગુરોરબુદ્ધાઃ ॥ ૩૪૮॥

વિના વિચારં બત જીવમેનં
દેહીતિ ચાત્મેત્યપિ મન્યમાનાઃ ।
સંસારિતાદ્યાનપિ ચાસ્ય ધર્મા-
નારોપયન્ત્યાત્મનિ નિત્યમુક્તે ॥ ૩૪૯॥

અતો મતાનિ પ્રભવન્તિ નાના
સત્યાત્મનઃ સર્વમતાતિગસ્ય ।
બદ્ધં તમેનં બત મન્યમાના-
શ્ચરન્ત્યનેકાનપિ યોગમાર્ગાન્ ॥ ૩૫૦॥

કર્તૃત્વભોક્તૃત્વશરીરિતાદ્યાઃ
સંસારિતા ચાપ્યુત જીવધર્માઃ ।
ધર્મા ન તે શુદ્ધચિદાત્મકસ્ય
સત્યાત્મનઃ સઙ્ગવિવર્જિતસ્ય ॥ ૩૫૧॥

સ્વં જીવભૂતં બત મન્યતે યો
દેહાત્મભાવો ન હિ તસ્ય નષ્ટઃ ।
બોધાત્મતાં સ્વસ્ય ન બુધ્યતે ય-
સ્તસ્યાનિવાર્યો વપુરાત્મભાવઃ ॥ ૩૫૨॥

આત્મા સુષુપ્તૌ ચ સુખસ્વરૂપો
લોકૈઃ સમસ્તૈરનુભૂયતે યત્ ।
દેહાત્ પૃથક્ સ્વો ભવતીતિ બોદ્ધું

શક્નોતિ ધીમાન્ ખલુ સૂક્ષ્મબુદ્ધ્યા ॥ ૩૫૩ ॥

નાઙ્ગીકરોતિ હ્યત એવ ધીમાન્
દેહાત્મતાં સ્વસ્ય વિચારણાયામ્ ।
તથાઽપ્યવિજ્ઞાતનિજસ્વરૂપો
ભૂયોઽપિ દેહાત્મમતિં કરોતિ ॥ ૩૫૪॥

યાવન્ન જીવત્વમતિવ્યપૈતિ
દેહાત્મધીર્નૈવ વિનાશમીયાત્ ।
નશ્યેત્તુ સા તુર્યપદસ્વ લાભા-
દ્યત્રાનુભૂયેત પરં સ્વતત્ત્વમ્ ॥ ૩૫૫॥

જાનાતિ યઃ સ્વં પરમદ્વિતીયં
તુરીયભાવે સ્થિતિમેત્ય નિત્યામ્ ।
ન તસ્ય જીવોઽહમિતિ પ્રતીતિઃ
સ એવ દેહાત્મધિયા વિમુક્તઃ ॥ ૩૫૬॥

દેહાત્મભાવં મન આત્મભાવં
જીવાત્મભાવં ચ મૃષેતિ બુદ્ધ્વા ।
બોધાત્મતાં સ્વામવગન્તુમિચ્છન્
યતેત સાધૂ રમણોક્તરીત્યા ॥ ૩૫૭॥

વિચાર્યમાણે સતિ જીવતત્ત્વે
બુદ્ધોપદેશૈઃ પરિશુદ્ધબુદ્ધ્યા ।
આવિદ્યકોઽયં બત જીવનામા
ન તત્ત્વતોઽસ્તીતિ સુબોધમેવ ॥ ૩૫૮॥

મન્યન્ત આત્મદ્વિતયં ચ કેચિદ્
ભેદેન જીવાત્મપરાત્મનશ્ચ ।
જીવસ્ય ચાત્મેતિ પરં વદન્તિ
જીવઃ શરીરં પરમસ્ય ચેતિ ॥ ૩૫૯॥

જીવાત્મતૈવં ચલમધ્રુવં ય-
દાત્મા યથાર્થઃ પર એવ નાન્યઃ ।
જીવાભિધોઽસન્ પર એવ સત્ય
ઇત્યુચ્યતેઽસ્મદ્ગુરુણા સ્ફુટં ચ ॥ ૩૬૦॥

મૃષાત્વવાચી ખલુ જીવશબ્દઃ
સત્યત્વવાચી પરશબ્દ એવ ।
જીવો મૃષેત્યેવમવેત્ય સાધુ-
ર્જીવાત્મભાવં પ્રયતેત હાતુમ્ ॥ ૩૬૧॥

જૈવેન રૂપેણ તમેવ દેહે-
    ષ્વનુપ્રવિષ્ટં શ્રુતયો વદન્તિ ।
અતો ન જીવોઽસ્તિ પૃથક્ પરસ્મા-
    દિત્યેવમર્થો ભવતિ સ્ફુટં નઃ ॥ ૩૬૨॥

ઉદેતિ જીવો ન વિલીયતે ચ
    સત્યાત્મનો નૈવ લયોદયૌ સ્તઃ ।
જીવા અનેકે ચ સ એક એવ
    સત્યેવમાત્મા કથમસ્તુ જીવઃ ॥ ૩૬૩ ॥

વિશુદ્ધચિન્માત્રતયા સ્વતઃ સન્
    ન લીયતે સ્વો હિ સુષુપ્તિભાવે ।
અસન્ સ્વતોઽજ્ઞાનસમુત્થિતોઽયં
    પ્રયાતિ જીવસ્તુ લયં સુષુપ્તૌ ॥ ૩૬૪॥

સુષુપ્તિભાવે સુખરૂપકો યો
    લોકૈઃ સમસ્તૈરનુભૂયતે ચ ।
તુરીયભાવે પરિશિષ્યતે ચ
    શુદ્ધોઽદ્વયઃ સન્ સ હિ સત્ય આત્મા ॥ ૩૬૫॥

સુષુપ્તિભાવેઽપ્યહમિ પ્રલીને
    તુરીયભાવેઽપ્યહમિ પ્રણષ્ટે ।
વિભાત્યવિચ્છિન્નતયેત્યસૌ સ્વો
    નિગદ્યતેઽહમ્પદલક્ષિતાર્થઃ ॥ ૩૬૬॥

બ્રહ્માત્મકોઽસાવહમિત્યજસ્રં
    સ્વયં વિભાત્યાત્મતયા હૃદન્તઃ ।
વપુર્મિતં જીવમિમં તુ તસ્મિન્
    પૂર્ણે પરેઽધ્યસ્યતિ હન્ત મોહાત્ ॥ ૩૬૭॥

અસ્મીતિ બોધં ન રુણદ્ધ્યવિદ્યા
    બોધોઽહમસ્મીતિ તુ બોધમેવ ।
જાનાતિ સર્વોઽપિ હિ નૈજસત્તાં
    જાનાતિ ન સ્વં નિરુપાધિકં તત્ ॥ ૩૬૮॥

નાહન્તયોદેતિ ચિદાત્મકઃ સ્વો
    જડો ન દેહોઽહમિતિ બ્રવીતિ ।
મધ્યે તયોઃ કશ્ચિદુદેત્યબોધે
    વપુઃ પ્રમાણસ્ત્વહમિત્યસત્યઃ ॥ ૩૬૯॥

અહંસ્વરૂપા ચિતિરાત્મનો યા
 જડં વપુશ્ચેત્યુભયોશ્ચ યોગાત્ ।
ઉદેતિ દેહોઽહમિતિ પ્રતીતિઃ
 પ્રતીતિરેષૈવ હિ જીવરૂપમ્ ॥ ૩૭૦॥

દેહાત્મનોરેકતયાઽવગત્યા
 પ્રતીયતે સત્યવદેષ યસ્માત્ ।
તચ્ચિજ્જડગ્રન્થિરિતિ પ્રથાઽસ્ય
 ભવત્યવિદ્યાપરિકલ્પિતસ્ય ॥ ૩૭૧॥

જડેન દેહેન કદાઽપિ સઙ્ગઃ
 સત્યાત્મનો નાસ્તિ યથાર્થતસ્તુ ।
નૈવોદભૂત્ કશ્ચન જીવનામા
 નૈવાપ જીવત્વમસૌ ચ પૂર્ણઃ ॥ ૩૭૨॥

સ્વયમ્પ્રકાશં નિરપેક્ષમેકં
 ચૈતન્યમાત્માકૃતિકં હિ સત્યમ્ ।
ચૈતન્યમન્યન્ન હિ કિઞ્ચિ-
 દસ્તીત્યચિત્સ્વરૂપઃ ખલુ જીવ એષઃ ॥ ૩૭૩ ॥

પ્રતીયતે ચેતનવત્તુ જીવ
 આત્મસ્વરૂપસ્ય ચિદંશયોગાત્ ।
અતો હિ વેદાન્તિન આહુરેનં
 જીવં ચિદાભાસમસત્સ્વરૂપમ્ ॥ ૩૭૪॥

સ્વયં સમાગત્ય યથા વિવાહે
 વદન્ વરસ્યાસ્મિ સખેતિ મિથ્યા ।
વધૂગૃહિભ્યો લભતે સપર્યાં
 જીવોઽયમઙ્ગીક્રિયતે તયાઽજ્ઞૈઃ ॥ ૩૭૫॥

કોઽયં કુતો વેતિ વિચાર્યમાણો
 વધૂગૃહિભ્યઃ સ્વયમેષ ધાવેત્ ।
ધાવેત્ તથૈવ સ્વયમેષ જીવઃ
 કોઽયં કુતો વેતિ વિચાર્યમાણઃ ॥ ૩૭૬॥

ન રૂપમસ્યાસ્તિ યથાર્થતો યત્
 પિશાચવદ્ દેહગૃહે સ્થિતસ્ય ।
તદ્ દેહરક્ષાર્થમયં નિયુક્તઃ

पिशाच एवेति गुरुर्ब्रवीति ॥ ३७७॥

न शिष्यते किञ्चन रूपमस्य
तुरीयभावाधिगमे गवेषात् ।
एवं प्रबुद्धो भगवान् गुरुर्नो
मृषात्वमस्य प्रकटीकरोति ॥ ३७८॥

आद्या मनोवृत्तिरियं ह्यहन्धी-
रतोऽन्यधीवृत्तय उद्भवन्ति ।
अतो मनः सूक्ष्मवपुः प्रपञ्चो
भवोऽपि बन्धोऽप्ययमेव नान्यत् ॥ ३७९॥

बन्धोऽपि बद्धोऽप्ययमेक एव
बद्धोऽस्ति नास्मादितरोऽत्र कश्चित् ।
स्वो नित्यमुक्तप्रकृतिर्हि सत्यः
स बन्धमाप्नोति कथं नु वाच्यम् ॥ ३८०॥

अस्मिन्नहन्नामनि जातमात्रे
सञ्जायते विश्वमिदं सहैव ।
अस्मिन् विलीने लयमेति विश्वं
तद्विश्वमस्यैव हि रूपमुक्तम् ॥ ३८१॥

नित्यापरोक्षोऽपि सदैव पुंस
आत्मा महान् प्रेष्ठ उरुप्रकाशः ।
दुरात्मनाऽहङ्कृतिरूपकेण
हृतप्रभो यद्वदलं न भाति ॥ ३८२॥

आच्छादयत्येष मृषात्मकोऽपि
सत्यात्मरूपं खलु जीवनामा ।
अतोऽज्ञपुंसा बहुभिर्विकल्पै-
र्विकल्पितः स्वोऽस्ति हि नष्टकल्पः ॥ ३८३॥

भानुप्रभासञ्जनिताभ्रपङ्क्ति-
स्तिरोदधात्येव हि भानुरूपम् ।
तिरोदधात्येव तथाऽऽत्मरूपं
तस्यैव संवित्प्रभयोदितोऽयम् ॥ ३८४॥

किं तेन चोरेण कृतं न पाप-
मात्मापहर्त्रेत्यपि वेदवाणी ।
निन्दत्यहन्धीमुषितात्मतत्त्वं

પાપેન તેનૈવ ચ દૂયમાનમ્ ॥ ૩૮૫॥

યદાદિમં પાપમૂદીરયન્તિ
ક્રીસ્તાનુગા મૃત્યુકરં નરાણામ્ ।
કર્માદ્યપુંસો ન હિ તત્ પરં તુ
વપુષ્યહન્તેતિ ગુરુર્બ્રવીતિ ॥ ૩૮૬॥

ઇદં નરસ્યૈવ હિ પાપમુક્તં
ન હ્યસ્તિ પુંસાં નરતા સુષુપ્તૌ ।
દેહાત્મમત્યૈવ નરત્વધીર્યત્
દેહાત્મધીરેવ હિ પાપમાદ્યમ્ ॥ ૩૮૭॥

નષ્ટિઃ સમસ્તાઽપ્યગુણઃ સમસ્તો
દુઃખં સમસ્તં ચ વપુષ્યહન્ધીઃ ।
લાભઃ સમસ્તોઽપિ ગુણઃ સમસ્તઃ
સુખં સમસ્તં ચ તદીયનાશઃ ॥ ૩૮૮॥

આત્માઽજ્ઞપુંસોઽપ્યહમા વિનષ્ટો
લબ્ધ્વાઽપિ સર્વં કૃપણો હિ સોઽયમ્ ।
સ્વમેવ લબ્ધ્વા ત્વહમો વિનાશા-
લ્લબ્ધવ્યમન્યન્ન હિ વીક્ષતે જ્ઞઃ ॥ ૩૮૯॥

સત્યં શરીરં બત મન્યમાના
આત્મેતિ મત્વાઽપ્યુત જીવમેવ ।
વેદાન્તવાક્યાનયથાવદેવ
બુદ્ધ્વાઽઽત્મનાનાત્વમુદીરયન્તિ ॥ ૩૯૦॥

યદ્યેક આત્મા દ્વિવિધોઽસ્તિ દોષ
એકસ્ય મુક્તૌ સકલસ્ય મુક્તિઃ ।
મુચ્યેત નો કોઽપ્યથવેતિ મુગ્ધા
મુધા વદન્ત્યશ્રુતતુર્યતત્ત્વાઃ ॥ ૩૯૧॥

જીવા ભવેઽસ્મિન્ બહવો ભવન્તુ
સત્યાત્મનો નૈવ બહુત્વમિષ્ટમ્ ।
નાના મૃષૈવાપ્યુત જીવરૂપ-
મેકં ચ સત્યં શિવમાત્મરૂપમ્ ॥ ૩૯૨॥

અંશાં ન સત્યા હિ ચિતઃ પરસ્ય
અવિદ્યયાઽંશાઃ પરિકલ્પિતા હિ ।
પદે તુરીયે વિદુષો વિભાતિ

પૂર્ણાઽવિભક્તા ચ નિરંશકા સા ॥ ૩૯૩ ॥

ચિદેકકા સર્વગતા સમા ચ
તસ્યા વિભાગો વિષમોઽજ્ઞતૈવ ।
દેશો ન સત્યો હ્યત એવ તસ્યાઃ
સમો વિભાગોઽપિ ચ નાસ્તિ સત્યઃ ॥ ૩૯૪॥

વિસ્પષ્ટમેવં ગુરુણોપદિષ્ટા
ચિતઃ પરસ્યા અવિભક્તતૈવ ।
મુહ્યન્ત્વબુદ્ધસ્ય ગુરોસ્તુ શિષ્યા
અસ્માકમત્રાસ્તુ કથં નુ મોહઃ ॥ ૩૯૫॥

સિદ્ધે મૃષાત્વે સતિ જીવનામ્ન-
શ્ચિન્ત્યે કથં બન્ધવિમોચનેઽસ્ય ।
ન બન્ધમુક્તી ભવતોઽચ્યુતસ્ય
પૂર્ણસ્ય સત્યાત્મન એકકસ્ય ॥ ૩૯૬॥

દેહસ્ય દિક્કાલમિતસ્ય ચાસ્ય
તયોરતીતસ્ય ચિદાત્મનશ્ચ ।
પરસ્પરાધ્યાસકૃતાવિવેકાત્
પ્રતીયતે સત્યવદેષ જીવઃ ॥ ૩૯૭॥

ક્વચિચ્છરીરેઽહમિતિ પ્રતીત્યા
તત્સત્યમેવેત્યપિ નિશ્ચયેન ।
પશ્યન્નનેકાનિ વપૂંશિ સદ્ભ-
જ્જીવાન્ પૃથક્ પશ્યતિ તત્ર તત્ર ॥ ૩૯૮॥

એકઃ શરીરેષ્વનૃતેષુ સત્યો
વિભક્તવદ્ભાત્યવિભક્ત આત્મા ।
પૂર્ણં તમાત્માનમરૂપમજ્ઞો
મત્વા સરૂપં સમવૈત્યનેકમ્ ॥ ૩૯૯॥

પ્રતિક્ષણં નૂતનમેવ ચિત્રં
પશ્યન્ યથૈકં મનુતે તથૈવ ।
પ્રતિક્ષણં વીક્ષ્ય નવં શરીરં
તત્સર્વમેકં મનુતેઽજ્ઞમર્ત્યઃ ॥ ૪૦૦॥

એવં સદા નૂતન એવ દેહે
જીવં નવં કલ્પયતેઽસ્ય ચિત્તમ્ ।
અતો હિ બુદ્ધા નિગદન્તિ જીવં

તમેનમેવ ક્ષણિકં ચ મિથ્યા ॥ ૪૦૧॥

દેહોઽહમિત્યુત્તમપૂરુષં ચ
દેહાન્તરે મધ્યમપૂરુષં ચ ।
અન્યત્ર દેહે પ્રથમં પુમાંસં
પશ્યત્યવિજ્ઞાતનિજસ્વરૂપઃ ॥ ૪૦૨॥

ભિન્નાસ્ત્રિધૈવં પુરુષા ન સત્યા
દેહોઽહમિત્યજ્ઞતયા પ્રતીતાઃ ।
નષ્ટેઽહમિ સ્વાત્મગવેષણેન
ચિદ્રૂપ આત્મૈકક એવ ભાયાત્ ॥ ૪૦૩॥

પ્રત્યેતિ યઃ સ્વં બત જીવભૂતં
જીવા અનેકે વિલસન્તિ તસ્ય ।
એવંવિધા જ્ઞાનવિવર્જિતસ્ય
ભાયાન્ન બુદ્ધસ્ય તુ કોઽપિ જીવઃ ॥ ૪૦૪॥

સ્ત્રિયઃ પુમાંસો બહવશ્ચરન્તિ
પટપ્રકાશે ખલુ ચિત્રમાત્રાઃ ।
એવં ચરન્ત્યાત્મનિ ચિત્સ્વરૂપે
જીવા અનેકે બત ચિત્તમાત્રાઃ ॥ ૪૦૫॥

પટપ્રકાશોપમમાત્મતત્ત્વં
ચિત્રોપમા એવ ભવન્તિ જીવાઃ ।
આત્માદ્વયત્વં પરમાર્થમેવં
ન બાધ્યતે જીવબહુત્વભાનાત્ ॥ ૪૦૬॥

આત્મેતિ જીવસ્ય વિનિશ્ચયેન
પ્રત્યેતિ નાનાત્વમિહાત્મનાં ચ ।
સત્યં તુ નાત્માનમવૈતિ પૂર્ણં
મુહ્યત્યતો ભેદધિયાઽપકૃષ્ટઃ ॥ ૪૦૭॥

યથા શરાવેષુ પૃથગ્ જલેષુ
વિભાન્ત્યનેકે પ્રતિબિમ્બચન્દ્રાઃ ।
તથૈવ દેહેષુ મનસ્સુ ભાન્તિ
જીવા અનેકે પ્રતિબિમ્બમાત્રાઃ ॥ ૪૦૮॥

યથાર્થ ચન્દ્રો ભવિતા યથૈક
આત્મા યથાર્થોઽપિ તથૈક એવ ।
યથા ચ નાના પ્રતિબિમ્બચન્દ્રાઃ
વિભાન્તિ નાનેવ તથૈવ જીવાઃ ॥ ૪૦૯॥

પૃથગ્ જલેન્દોર્નિધને વિભાન્તિ
　　યથૈવ પૂર્વં હિ જલેન્દવોઽન્યે ।
પૃથક્ ચિદાભાસમૃતૌ તથાન્યે
　　પૂર્વં યથા ભાન્તિ મૃષૈવ સન્તઃ ॥ ૪૧૦॥

યો યો વિજાનાતિ નિજં સ્વરૂપં
　　તસ્મૈ ભવોઽયં વિરતિં પ્રયાતિ ।
અન્યે યથાપૂર્વમિહ ભ્રમન્તિ
　　યાવદ્વિજાનન્તિ નિજં ન તત્ત્વમ્ ॥ ૪૧૧॥

એષોપમા મન્દમતિભ્ય ઉક્તા
　　તેષાં મૃષાજ્ઞાનમનૂદ્ય બુદ્ધૈઃ ।
જીવો મૃષૈવેત્યવયન્તિ યે તુ
　　નિરર્થકોઽયં ભવિતા વિવાદઃ ॥ ૪૧૨॥

સ્વપ્ને યથા માનસમોહજાતા
　　જીવા અનેકે વિલસન્તિ સદ્વત્ ।
તથાઽજ્ઞપુંસાં વિલસન્ત્યનેકે
　　જીવા ઇમે જાગરિતેઽપ્યસન્તઃ ॥ ૪૧૩॥

સ્વાનાં બહુત્વં વદતાં પ્રમાણં
　　નિરસ્તદોષં ન હિ કિઞ્ચિદસ્તિ ।
આત્માદ્વયત્વેઽસ્ત્યુભયં પ્રમાણં
　　બુદ્ધાનુભૂતિશ્ચ તદુક્તયુક્તિઃ ॥ ૪૧૪॥

અહંસ્વરૂપેણ સદૈકધાઽન્ત-
　　રાત્મા શરીરેષુ વિભાતિ યસ્માત્ ।
તત્ સર્વદેહેષુ સ એક એવે-
　　ત્યસ્મદ્ગુરુઃ શ્રીરમણો બ્રવીતિ ॥ ૪૧૫॥

ધ્યેયા સદૈવાદ્વયતા પ્રયત્નાદ્
　　વર્તેત નાદ્વૈતધિયા ક્રિયાસુ ।
મન્યેત લોકત્રિતયેઽદ્વયત્વં
　　મન્વીત નૈવં ગુરુણા તુ સાકમ્ ॥ ૪૧૬॥

યથાઽજ્ઞપુંસાં ભુવનં વિભાતિ
　　ભાયાત્ તથેદં વિદુષઃ કથં નુ ।
યેન પ્રકારેણ વિભાતિ વિશ્વં

બુદ્ધસ્ય તં ચાપિ ગુરુર્બ્રવીતિ ॥ ૪૧૭॥

ઈશોઽપિ જીવા જડવસ્તુજાત-
મિતિ પ્રતીતં જગદજ્ઞમર્ત્યૈઃ ।
બુદ્ધસ્ય ભાત્યાત્મતયા સમસ્તં
હ્યારોપિતાંશપ્રવિલાપનેન ॥ ૪૧૮॥

તત્ તુર્યનિષ્ઠાં સહજામવાપ્ય
જીવન્ વિમુક્તો વિનિવૃત્તમોહઃ ।
નાત્મેતરત્ કિઞ્ચન વીક્ષતે યત્
કિમપ્યસત્ તસ્ય ભવેત્ કથં નુ ॥ ૪૧૯॥

તત્ સ્વમ્ શરીરં ભુવનં ચ સત્યં
વદેત્ પ્રબુદ્ધોઽપિ ચ યદ્વદજ્ઞઃ ।
ભાવે દ્વયોરસ્તિ મહાંસ્તુ ભેદો
નારોપિતાંશો વિદુષો હિ ભાતિ ॥ ૪૨૦॥

મુમુક્ષુપુંસે હિ વિવેકદૃષ્ટિ-
ર્વિધીયતે નૈવ વિમુક્તપુંસઃ ।
ભવેન્મુમુક્ષોરવિવેકદૃષ્ટિ-
ર્ન સમ્ભવેત્ સા ખલુ બુદ્ધપુંસઃ ॥ ૪૨૧॥

દેહાત્મમત્યાઽજ્ઞજનઃ સરૂપં
વપુર્મિતં ચાપિ હિ મન્યતે સ્વમ્ ।
જ્ઞો વેત્ત્યનન્તં સ્વમરૂપમેકં
ભાવે ભિદૈવં ભવતિ દ્વયોશ્ચ ॥ ૪૨૨॥

શરીરમિત્યજ્ઞજનેક્ષિતં યદ્
બુદ્ધસ્ય ભાત્યત્મતયૈવ તદ્ધિ ।
તદેવ બુદ્ધોઽહમિતિ બ્રવીતિ
હ્યુપેક્ષ્ય બોધેન શરીરરૂપમ્ ॥ ૪૨૩॥

સત્યં પ્રપઞ્ચં વદતોર્દ્વયોશ્ચ
વાક્યે સમાનેઽપિ ભિદાઽસ્તિ ભાવે ।
અજ્ઞસ્ય ભેદૈર્હિ નિમીલિતં સત્
સત્યં યથાવદ્વિદુષસ્ય ભાતિ ॥ ૪૨૪॥

આધારસત્યં જગતોઽવિદિત્વા
સમીક્ષ્ય ચારોપિતવસ્તુજાતમ્ ।
મન્વાન એતત્ સ્વત એવ સત્યં

ब्रवीति सत्यं जगदित्यविद्वान् ॥ ४२५॥

વિભાત્યધિષ્ઠાનસદેવ શુદ્ધ-
મનામરૂપં વિદુષો હિ સાક્ષાત્ ।
નારોપિતં ભાતિ હિ તસ્ય સદ્વત્
વદેન્મૃષા વિશ્વમસૌ કથં નુ ॥ ૪૨૬॥

આચ્છાદકં વિશ્વમિદં પરસ્ય
સ્વાજ્ઞાનસન્દૂષિતલોચનસ્ય ।
આચ્છાદ્યતે તેન સતા પરેણ
સ્વજ્ઞાનસંશોધિતલોચનસ્ય ॥ ૪૨૭॥

તત્ત્વં વિજાનન્ મૃગતૃષ્ણિકાયા
ભૂયો યથા પશ્યતિ તામમૂઢઃ ।
પશ્યંસ્તથા વિશ્વમિદં પ્રબુદ્ધો
ન મન્યતે સત્યમિદં યથાઽજ્ઞઃ ॥ ૪૨૮॥

વિશ્વં યથાઽજ્ઞૈઃ સદિતિ પ્રતીતં
નૈવં હિ સત્યં તદિદં કથઞ્ચિત્ ।
સત્યં યથેદં વિદુષો વિભાતિ
જનન્ત્યબુદ્ધા ન હિ તં પ્રકારમ્ ॥ ૪૨૯॥

યદજ્ઞપુંસાં બહુભેદભિન્નં
સરૂપકં સ્વાન્યદિવાવભાતિ ।
તદેતદાત્મૈવ હિ બુદ્ધપુંસો
નિરસ્તભેદોઽપ્યુત રૂપહીનઃ ॥ ૪૩૦॥

અત્યન્તમિથ્યા ન હિ વિશ્વમુક્તં
નેદં નરાશ્વાદિવિષાણતુલ્યમ્ ।
અત્યન્તમિથ્યા યદિ નૈવ ભાયાદ્
ભાતિ ત્વધિષ્ઠાનસદંશયોગાત્ ॥ ૪૩૧॥

મિથ્યા હ્યધિષ્ઠાનસતા વિહીનં
વન્ધ્યાસુતાદ્યં ન વિભાતિ કિઞ્ચિત્ ।
મિથ્ય ત્વધિષ્ઠાનસતિ પ્રતીતં
રજ્જ્વાં યથાઽહિઃ સદિવાવભાતિ ॥ ૪૩૨॥

સત્તાઽપ્યસત્તાઽપ્યુભયં ચ વાચ્યં
વિશ્વસ્ય નાસ્ત્યત્ર વિરોધલેશઃ ।
સત્તાઽસ્ત્યધિષ્ઠાનસદંશયોગા-

ન્મિથ્યાત્વમારોપિતનામરૂપૈઃ ॥ ૪૩૩ ॥

સત્યત્વમઙ્ગીકૃતમેવમસ્ય
કિં ત્વેતદસ્તીત્યુચિતં ન વક્તુમ્ ।
સત્તાસ્તિતે દ્વે ભવતો વિભિન્ને
તદુચ્યતેઽસ્તીતિ યત્ સ્વતઃ સત્ ॥ ૪૩૪॥

વદન્તિ વિશ્વં વ્યવહારસત્યં
પ્રાતીતિકં સ્વપ્નસમીક્ષિતં ચ ।
બ્રહ્માદ્વિતીયં પરમાર્થસત્યં
મુધા વિકલ્પાસ્ત ઇમે હિ ભેદાઃ ॥ ૪૩૫॥

એકસ્વરૂપૈવ હિ સત્યતાઽસ્તિ
ન સન્તિ ભેદાઃ ખલુ સત્યતાયામ્ ।
અતો હ્યસત્યં દ્વિતયં સમાનં
સ્વપ્નેક્ષિતં જાગરિતેક્ષિતં ચ ॥ ૪૩૬॥

વિશ્વસ્ય મિથ્યાત્વમિહોપદિષ્ટં
સ્વાન્વેષણાત્ તુર્યપદસ્યલિપ્સોઃ ।
સત્યં પ્રપઞ્ચં બત મન્યમાનો
વિદ્યાત્ કથં સ્વં પરમાર્થસત્યમ્ ॥ ૪૩૭॥

યત્ સત્યવત્ સ્યાદનૃતસ્ય ભાનં
જ્ઞાનેન તસ્યસ્તિ વિરામ એવ ।
સંવિદ્વિવસ્વાન્ ખલુ સત્ય આત્મા
તત્સન્નિધાને કથમસ્ત્વવિદ્યા ॥ ૪૩૮॥

અસ્ત્યજ્ઞતા ચેદથ કસ્ય સેતિ
પ્રશ્નોઽત્ર જાગર્તિ હિ સાધકસ્ય ।
તેનાત્મતત્ત્વં પરિમૃગ્યતે ચે-
દજ્ઞોઽજ્ઞતા દ્વે વ્રજતો વિનાશમ્ ॥ ૪૩૯॥

અજ્ઞાનમઙ્ગીક્રિયતેઽત્ર શાસ્ત્રે
જીવાભિધસ્યૈવ હિ કલ્પિતસ્ય ।
નૈવાત્મનોઽઙ્ગીકૃતમેતદસ્તિ
સ નિત્યબુદ્ધપ્રકૃતિર્હિ તુર્યઃ ॥ ૪૪૦॥

સમ્બધ્યતે નૈવ સહાનૃતેન
દ્વૈતપ્રપઞ્ચેન કદાચિદાત્મા ।
દેશેન કાલેન નિમિત્તતો વા
યથેહ રજ્જુર્ભુજગેન સાકમ્ ॥ ૪૪૧॥

ઉક્તા જગત્કારણતા પરસ્ય
 ભવત્યસત્યૈવ હિ તત્ત્વદૃષ્ટ્યા ।
પરસ્ય શક્તિસ્ત્રિગુણાત્મિકા યા
 માયાભિધા કારણમુચ્યતે સા ॥ ૪૪૨॥

દ્વે બ્રહ્મણી હિ શ્રુતિષુ પ્રસિદ્ધે
 નિર્બીજકં ચાપિ સબીજકં ચ ।
નિર્બીજકં બ્રહ્મ તુરીયસઞ્જ્ઞં
 સબીજકં શક્તિમદીશરૂપમ્ ॥ ૪૪૩ ॥

સ્વભાવતો નિશ્ચલ એક આત્મા
 નૃત્યં કરોતીવ તયાઽઽત્મશક્ત્યા ।
લીના યદા સા ત્વચલસ્વરૂપે
 ભાયાદસૌ નિશ્ચલ એકકઃ સન્ ॥ ૪૪૪॥

માયેયમુક્તા વ્યવહારદૃષ્ટ્યા
 મિથ્યાજગત્કારણપૃચ્છકાનામ્ ।
માયાઽપિ તત્કાર્યમિદં જગચ્ચ
 દ્વયં ચ મિથ્યા પરમાર્થદૃષ્ટ્યા ॥ ૪૪૫॥

કા નામ માયા કતમાઽસ્ત્યવિદ્યા
 સૃષ્ટં જગત્કેન કથં ચ પૂર્વમ્ ।
કથં ન્વભૂજ્જીવ ઇતિ સ્મ મોહાત્
 પ્રશ્નાઃ ક્રિયન્તેઽત્ર મુધૈવ મર્ત્યૈઃ ॥ ૪૪૬॥

માયેદૃશી યન્નિધનાન્મુમુક્ષુ-
 ર્લભેત નિષ્ઠાં નિજસત્સ્વરૂપે ।
ન વેત્તિ બુદ્ધોઽપિ તદીયરૂપં
 સા પ્રેક્ષ્યમાણૈવ હિ નાશમેતિ ॥ ૪૪૭॥

Quote - Yoga Vasishtha
 ઈદૃશી રામ માયેયં યા સ્વનાશેન હર્ષદા ।
 ન લક્ષ્યતે સ્વભાવોઽસ્યાઃ પ્રેક્ષ્યમાણૈવ નશ્યતિ ॥

મનસ્તયા બ્રહ્મ ન પર્યણંસીત્
 જગત્તયા બ્રહ્મ ન પ્રયણંસીત્ ।
બ્રહ્માસ્તિ નૈજામલચિત્સ્વરૂપા-
 દપ્રચ્યુતં કાલદિગાદ્યતીતમ્ ॥ ૪૪૮॥

નાભૂજ્જગન્ન પ્રલયં વ્રજેદ્વા
   નૈવોદભૂત્ કશ્ચન જીવનામા ।
ન બદ્ધમુક્તૌ ન ચ સાધકો વા
   સર્વોત્તમં સત્યમિદં નિરુક્તમ્ ॥ ૪૪૯॥

યથા ચલચ્ચિત્રતિપ્રસૃત્યા
   નાધારવસ્ત્રં ભજતે વિકારમ્ ।
ન વિક્રિયામેતિ તથા પરાત્મા
   પ્રતીયમાને સતિ ચ પ્રપઞ્ચે ॥ ૪૫૦॥

શ્રીશઙ્કરાચાર્યવરેણ સોઽયં
   સિદ્ધાન્ત ઉક્તોઽસ્ત્યસકૃત્ સ્ફુટં ચ ।
અનેકધા સ્પષ્ટમિમં બ્રવીતિ બુદ્ધો
   ગુરુઃ શ્રીરમણોઽપિ સાધોઃ ॥ ૪૫૧॥

ઉક્તં હિ નેતાસ્તિ તુરીયમેવ
   સત્યં તદન્યત્ ત્રિતયં મૃષેતિ ।
ઉક્તં ચ સત્યસ્ય સદાદ્વયત્વં
   દ્વૈતં ચ નિત્યં ચ મૃષાત્વમેવ ॥ ૪૫૨॥

ન કિઞ્ચનેહ ત્વદૃતેઽસ્તિ સત્યં
   ત્વમેકકઃ કાલદિગાદ્યતીતઃ ।
અપાસ્ય મિથ્યાભ્રમમાસ્સ્વ શાન્ત
   ઇત્યાત્મનિષ્ઠા ગદિતાઽસ્તિ તેન ॥ ૪૫૩ ॥

મત્સ્થાનિ ભૂતાનિ ન તત્ત્વદૃષ્ટ્યા
   મદીયમાયૈવ સમસ્તમેતત્ ।
ઇત્યાત્મનોઽજાતિમુવાચ સત્યાં
   ગીતાસુ કૃષ્ણો ભગવાન્ સ્વયં ચ ॥ ૪૫૪॥

પૂર્ણાત્મતાં સ્વામજહત્ પરં સત્
   સ્વમાયયા પૂર્ણમિદં બભૂવ ।
બુદ્ધસ્ય પૂર્ણાત્મતયૈવ ભાતી-
   ત્યજાતિરુક્તા શ્રુતિશીર્ષવાચા ॥ ૪૫૫॥

વિસ્મૃત્ય યત્ સ્વં વપુરાત્મમત્યા
   ભ્રાન્ત્વાઽપ્યસઙ્ખ્યેષુ ભવેષુ ચાન્તે ।
સ્વતત્ત્વબોધાત્ ભવતિ સ્વ એવ
   સ સ્વપ્નલોકાટનતઃ પ્રબોધઃ ॥ ૪૫૬॥

યથા મનુષ્યો મધુપાનમત્તઃ
   કોઽહં નુ કુત્રાહમિતિ પપૃચ્છન્ ।
આત્મૈવ સન્નેવમિહાજ્ઞમર્ત્યઃ
   કોઽહં કુતોઽહં ન્વિતિ પૃચ્છતિ સ્વમ્ ॥ ૪૫૭॥

અસ્ત્યાત્મનોઽન્તર્વપુરિત્યબુદ્ધ્વા
   તસ્મિઞ્જડેઽસ્મીત્યભિમન્યતે યઃ ।
મન્યેત ચિત્રસ્થમસૌ તદીય-
   માધારભૂતં બત વસ્ત્રમેવ ॥ ૪૫૮॥

સ્વર્ણાત્ પૃથગ્ ભૂષણમસ્તિ કિં નુ
   સ્વસ્માત્ પૃથક્ કિં નુ શરીરમસ્તિ ।
શરીરમેવ સ્વમવૈત્યબુદ્ધઃ
   શુદ્ધં સ્વમેવ સ્વમવૈતિ બુદ્ધઃ ॥ ૪૫૯॥

તમેકમાત્માનમનાદિસત્યં
   મૌનોપદેશાદ્ ગુરુરાદિમોઽપિ ।
નિબોધયામાસ કથં નુ કોઽપિ
   વાચા વદન્ બોધયિતું સમર્થઃ ॥ ૪૬૦॥

ઇત્યાત્મતત્ત્વં બહુધોદિતં ચા-
   પ્યનુક્તમેવાનુ ભવૈકવેદ્યમ્ ।
તામ્ સ્વાનુભૂતિં નિરુણદ્ધિ ચિત્તં
   નિરૂઢદેહાત્મધિયા મુમુક્ષોઃ ॥ ૪૬૧॥

શ્રુત્યૈવ ચૈવં વિમલાન્તરઙ્ગાઃ
   સદ્યોઽપિ નિષ્ઠાં સહજાં લભેરન્ ।
અન્યૈસ્ત્વહઙ્કારવિનાશનાય
   સુસાધનં કિઞ્ચિદનુષ્ઠિતવ્યમ્ ॥ ૪૬૨॥

અન્તર્હૃદિ સ્વં વિમલં વિશોકં
   જિજ્ઞાસયાઽન્વિષ્ય લભેત શાન્તિમ્ ।
ઇતિ શ્રુતિર્વક્તિ ગુરુશ્ચ માર્ગં
   ઋજું સ્વરૂપાનુભવાય સાધોઃ ॥ ૪૬૩॥

જિજ્ઞાસનં નામ નિગદ્યતેઽત્ર
   નિજસ્વરૂપાનુભવસ્ય લિપ્સા ।
તયૈવ હિ સ્વાત્મગવેષણેઽસ્મિ-
   ન્નન્તર્મુખત્વં ભવિતા મુમુક્ષોઃ ॥ ૪૬૪॥

શ્રુતિપ્રસિદ્ધં ભવનં પરસ્ય
સત્યાત્મભૂતસ્ય હૃદાખ્યમસ્તિ ।
સ એવ સર્વં હિ કથં નુ તસ્ય
નિર્દિશ્યતે સ્થાનમિદં હૃદાખ્યમ્ ॥ ૪૬૫॥

પ્રજ્ઞાસ્વરૂપં હૃદયં હિ સત્યં
પ્રજ્ઞાસ્વરૂપઃ સ ચ સત્ય આત્મા ।
અતઃ સ આત્મા હૃદયં હિ સત્યં
પ્રતિષ્ઠિતં સર્વમિદં હિ તસ્મિન્ ॥ ૪૬૬॥

તથાઽપિ બુદ્ધા નિગમાન્તવાચો
વિધાતુમન્તર્મુખતાં ગવેષે ।
અન્તઃ શરીરે નિલયં હૃદાખ્યં
દિશન્તિ તસ્યાનિલયસ્ય પુંસઃ ॥ ૪૬૭॥

બહુર્મુખાન્યેવ કિલેન્દ્રિયાણિ
યતઃ પ્રપઞ્ચેન નિમીલ્યતે સ્વઃ ।
ઉપાય ઉન્મીલયિતું સ્વરૂપં
સ્વાન્વેષણેઽન્તર્મુખતૈવ સાધોઃ ॥ ૪૬૮॥

Quote - Katha Upanishad
પરાઞ્ચિ ખાનિ વ્યતૃણત્ સ્વયમ્ભૂસ્તસ્માત્ પરાઙ્ પશ્યતિ ।
કશ્ચિદ્ધીરઃ પ્રત્યગાત્માનમૈક્ષદાવૃત્તચક્ષુરમૃતત્વમિચ્છન્ ॥

બન્ધસ્ય મુક્તેરિદમન્તરં હિ
સન્દર્શિતં સ્વાનુભવેન બુદ્ધૈઃ ।
બદ્ધસ્ય પુંસઃ સમુદેત્યહન્તા
નોદેત્યહન્તા તુ વિમુક્તપુંસઃ ॥ ૪૬૯॥

નિત્યાપરોક્ષોઽપિ સદૈવ જન્તો-
રાત્મા મહાન્ પ્રેષ્ઠ ઉરુપ્રકાશઃ ।
દુરાત્મનાઽહઙ્કૃતિરૂપકેણ
હૃતપ્રભો યદ્વદલં ન ભાતિ ॥ ૪૭૦॥

દેહોઽહમસ્મીત્યનુભૂતિરૂપો
ભવત્યબોધઃ ખલુ બન્ધરૂપઃ ।
બોધોઽહમસ્મીતિ વિનાઽનુભૂતિં
કથં નુ નીયેત વિનાશમેષઃ ॥ ૪૭૧॥

દેહોઽહમસ્મીતિ સમુદ્ભવન્તી

ધીરેવરૂપં ખલુ જીવનામ્નઃ ।
સત્યાંશમસ્યૈવ વિવિચ્ય સાધુ-
ર્ગવેષયેજ્જન્મભુવં તદીયમ્ ॥ ૪૭૨॥

નાત્યન્તમિથ્યા ખલુ જીવ એષ
નાયં હિ વન્ધ્યાતનયસ્ય તુલ્યઃ ।
આત્માહ્યધિષ્ઠાનતયાઽસ્તિ તસ્મા-
ન્મૃષાઽપિ સન્ સત્યવદેવ ભાતિ ॥ ૪૭૩ ॥

સત્યાંશ એતસ્ય હિ જીવનામ્નઃ
સત્યાત્મચૈતન્યમહંસ્વરૂપમ્ ।
આદાય સત્યાંશમિમં મુમુક્ષુઃ-
ર્ભવેત્ સમર્થો નિજમાર્ગણાય ॥ ૪૭૪॥

અસ્યાસદંશં વપુરાદિસર્વં
વિહાય શિષ્ટાં નિરુપાધિકાં તામ્ ।
સત્યાત્મનો દીધિતિવત્ સુસૂક્ષ્મા-
મહંસ્વરૂપાં ચિતિમાદદાનઃ ॥ ૪૭૫॥

શ્વા સ્વામિનં સ્વં સમુપૈતિ યદ્વત્
તદ્ગન્ધમાદાય ગવેષયિત્વા ।
લભેત યત્કિઞ્ચન મગ્નવસ્તુ
નિમજ્જ્ય યદ્વત્ સલિલે તથા વા ॥ ૪૭૬॥

અસ્યાહમો જન્મભુવં સ્વતત્ત્વં
વિમૃગ્ય કોઽહં નુ કુતોઽહમેષઃ ।
ઇતિ સ્વતત્ત્વાનુબુભૂષયાઽન્ત-
ર્નિમજ્જ્ય નિષ્ઠાં સહજાં લભેત ॥ ૪૭૭॥

બહિર્મુખત્વં નિજમાર્ગણેઽસ્મિન્
વ્રજેન્મનશ્ચેદ્વિષયાભિમુખ્યાત્ ।
પુનર્મનોઽન્તર્મુખમેવ કુર્યાત્
સાધુઃ પ્રયત્નાત્ પ્રવિલાપદૃષ્ટ્યા ॥ ૪૭૮॥

તરઙ્ગફેનાદિકમબ્ધિમાત્રં
સ્વાપ્નં જગત્ સ્વપ્નદૃગેવ યદ્વત્ ।
સર્વં જગચ્ચાપ્યહમેવ નાન્ય-
દિતિ પ્રતીતિઃ પ્રવિલાપદૃષ્ટિઃ ॥ ૪૭૯॥

કસ્યેદમેવં વિષયાભિમુખ્ય-

મિતિ સ્વતત્ત્વસ્ય દિદૃક્ષયા વા ।
અન્તર્મુખીકૃત્ય પુનઃ પુનશ્ચ
મનો નિયુઞ્જીત ગવેષયોગે ॥ ૪૮૦॥

કદા નુ નિષ્ઠાં સહજાં લભેયે-
ત્યેવં નિરુત્સાહમના વિષીદન્ ।
ભક્તોઽથવા સ્વાત્મગવેષયોગી
સ્વયં વિમુક્તેર્નિરુણદ્ધિ માર્ગમ્ ॥ ૪૮૧॥

ઉત્સાહસન્તોષયુતેન ભાવ્યં
મુમુક્ષુણા સાત્ત્વિકમાનસેન ।
અનુસ્મરન્ કાલમૃષાત્વમુક્તં
મનો નિયુઞ્જીત ગવેષયોગે ॥ ૪૮૨॥

પ્રશ્નસ્ય કોઽસ્મીતિ સદૈવ સાધો-
ર્દ્વારાણિ સર્વત્ર ચ સમ્ભવન્તિ ।
દ્વારેણ કેનાપિ ગવેષણેઽસ્મિન્
મનો નિયુઞ્જીત પુનઃ પુનશ્ચ ॥ ૪૮૩ ॥

નાસ્યોત્તરં કાચનબુદ્ધિવૃત્તિ-
ર્ન વેત્તિ ધીસ્તં ખલુ તુર્યસત્યમ્ ।
અસ્યોત્તરં સ્વાનુભવસ્તુરીયે
નષ્ટેઽહમિ પ્રષ્ટરિ જીવનામ્નિ ॥ ૪૮૪॥

યો નિર્વિકલ્પઃ સહજઃ સમાધિ-
સ્તત્રૈવ ભાયાત્ સ્ફુટમાત્મતત્ત્વમ્ ।
અન્યત્ર ધીવૃત્તિવિમિશ્રિતત્વાદ્
ભાયાદ્યથાવન્ન હિ સત્ય આત્મા ॥ ૪૮૫॥

નિયુક્તમેવં તુ મનો ગવેષે
લીયેત ચેન્નિષ્ફલ એવ યત્નઃ ।
લયાત્ પ્રબોધ્યાથ પુનશ્ચ સાધુ-
ર્મનો નિયુઞ્જીત મનોગવેષે ॥ ૪૮૬॥

નાશો લયશ્ચેત્યુભયપ્રકારો
મનોનિરોધો ગુરુણાઽસ્તિ દિષ્ટઃ ।
મનોલયસ્યાનિલરોધનાદ્યા
ભવન્ત્યુપાયા હઠયોગમાર્ગે ॥ ૪૮૭॥

મનો વિલીનં સહ વાસનાભિ-

ર્ભવાય પશ્ચાત્ પુનરુદ્ભવેદ્ધિ ।
નષ્ટં મનશ્ચેન્નિજમાર્ગણેન
નિર્વાસનં ભર્જિતબીજવત્ સ્યાત્ ॥ ૪૮૮॥

બધ્નાત્યવિદ્યા બત વાસનાભિઃ
સ્વાજ્ઞં હિ તા એવ મનઃ સ્વરૂપમ્ ।
ગવેષણે સ્યાદ્યદિ જાગરૂકં
મનસ્તુ તાસાં ભવિતાઽથ નાશઃ ॥ ૪૮૯॥

જ્ઞાનોદયઃ સ્યાન્મનસો વિનાશા-
ન્નષ્ટાસુ સર્વાસ્યપિ વાસનાસુ ।
મુક્તિર્નિરુક્તાઽખિલવાસનાના-
માત્યન્તિકો નાશ ઇતિ પ્રબુદ્ધૈઃ ॥ ૪૯૦॥

ક્ષુરસ્ય ધારા નિશિતા યથૈવં
માર્ગો હ્યયં સ્વાત્મવિચારનામા ।
રાગો લયશ્ચેત્યુભયં વિહાય
તિષ્ઠેત્ સદૈકાગ્રધિયા ગવેષે ॥ ૪૯૧॥

અન્યેષુ યોગેષુ હિ જીવનામા
સન્ કોઽપિ કર્માદિકદોષયુક્તઃ ।
અસ્તીતિ મત્વૈવ ચ દોષહીનં
વિધાતુમેનં યતતે હિ યોગી ॥ ૪૯૨॥

કર્મિત્વનાશાય ચ કર્મયોગો
વિભક્તિનાશાય ચ ભક્તિયોગઃ ।
વિયોગનાશાય ચ રાજયોગો-
ઽપ્યબોધનાશાય ચ બોધયોગઃ ॥ ૪૯૩ ॥

સ એવ સાક્ષાત્ પુરુષઃ પરઃ સન્
સ્વસ્માત્ પૃથક્ સ્વં ગણયન્નબુદ્ધઃ ।
તેનૈક્યમિચ્છન્ યતતે ચ યોગૈ-
ર્હાસ્યં હિ તસ્માદિતરત્ કિમસ્તિ ॥ ૪૯૪॥

આદાય જીવસ્ય ચિદંશમેવ
તન્મૂલભૂતાત્મગવેષણેન ।
નિર્દોષ આત્મૈવ હિ ભાત્યનન્તો
ન શિષ્યતે કશ્ચન તત્ર જીવઃ ॥ ૪૯૫॥

અતો મહાયોગસમાખ્યકોઽયં

નાન્યોઽસ્ય યોગસ્ય સમોઽધિકો વા ।
અન્તર્ભવન્ત્યત્ર સમસ્તયોગા
અઙ્ગાનિ તે હ્યસ્ય યથોચિતં સ્યુઃ ॥ ૪૯૬॥

જીવોદયસ્થાનગવેષણં યત્
સ એક એવાખિલયોગમાર્ગાઃ ।
સ કર્મયોગોઽપ્યુત ભક્તિયોગઃ
સ રાજયોગોઽપ્યુત બોધયોગઃ ॥ ૪૯૭॥

પ્રશ્નસ્વરૂપો હિ ગવેષ એવ
ન ધ્યાનવત્ સાધનમેતદુક્તમ્ ।
હૃન્મજ્જનં સમ્ભવતિ હ્યનેન
પ્રશ્નેન ન ધ્યાનપરમ્પરાભિઃ ॥ ૪૯૮॥

કેચિન્નિદિધ્યાસનમાચરન્તિ
શ્રુત્વાઽપિ મત્વાઽપિ નિજં સ્વરૂપમ્ ।
અન્યો હિ માર્ગોઽયમુતાન્ય એવ
સ્વાન્વેષરૂપો રમણોપદિષ્ટઃ ॥ ૪૯૯॥

બ્રહ્માત્મનોસ્તત્ ત્વમસીત્યભેદ-
શ્છાન્દોગ્યવેદાન્તનિરૂપિતોઽસ્તિ ।
અભેદ એષ પ્રતિપાદ્યતે ચ
વાચ્યાર્થલક્ષ્યાર્થવિવેચનેન ॥ ૫૦૦॥

વાક્યેઽત્ર તચ્છબ્દનિવેદિતસ્ય
ચર્ચાં વિના ત્વમ્પદલક્ષિતસ્ય ।
સત્યાત્મનસ્તત્ત્વગવેષણસ્ય
કર્તવ્યતાં શ્રીરમણો બ્રવીતિ ॥ ૫૦૧॥

એવં ગવેષેણ ભવેન્મુમુક્ષો-
ર્હૃન્મજ્જનાત્ સ્વાનુભવસ્તુરીયે ।
ન સ્યાન્નિદિધ્યાસનમસ્ય કાર્યં
નાનેન કાર્યં મનનં ચ દીર્ઘમ્ ॥ ૫૦૨॥

શ્રુત્યોદિતે તત્ત્વમસીતિ વાક્યે
ધ્યાનં ન કિઞ્ચિદ્વિહિતં હિ સાધોઃ ।
ઉક્તા પરસ્યૈવ તુરીયભાવે
બુદ્ધેન સત્યાત્મતયાઽનુભૂતિઃ ॥ ૫૦૩॥

તત્ત્વં સ્વકં યન્નિરુપાધિકં તદ્

ब्रह्मेति વેદાન્તગિરા સુસિદ્ધે ।
બ્રહ્માત્મનોરેકતયાઽનુભૂત્યૈ
સ્વાન્વેષણાત્ કિં કરણીયમન્યત્ ॥ ૫૦૪॥

વિહાય દેહાત્મમતિં વિમૃગ્ય
સ્વમેવ બુદ્ધ્વા હૃદિ નિષ્ઠિતસ્ય ।
ભાત્યાત્મરૂપઃ પર એવ સાક્ષા-
દિત્યર્થકો હિ શ્રુતિશીર્ષવાણી ॥ ૫૦૫॥

નિજસ્વરૂપસ્ય ગવેષણં યત્
સાક્ષાદ્ ભવેત્ સાધનમેતદેવ ।
ઉક્તં નિદિધ્યાસનમઙ્ગસ્ય
દેહાત્મધીનિર્મથનાય સાધોઃ ॥ ૫૦૬॥

હૃન્મજ્જનં સ્વાત્મગવેષણેઽસ્મિન્
ન સમ્ભવેદ્ દુર્બલમાનસસ્ય ।
વૃત્તિષ્વનેકાસુ વિભજ્યમાનં
નિતાન્તમલ્પં મનસો બલં હિ ॥ ૫૦૭॥

એકાગ્રતા યા મનસો ગવેષે
મનોબલં નામ તદેવ નાન્યત્ ।
ઈદૃગ્ બલં યસ્ય ભવેત્ સ એવ
ધીરઃ સ્વધીરક્ષણકૌશલેન ॥ ૫૦૮॥

ધ્યાનેન વર્ધેત મનોબલં યત્
તદ્ ધ્યાનમઙ્ગં નિજમાર્ગણસ્ય ।
ધ્યાનાન્મનો નિશ્ચલતાં પ્રસાધ્ય
તતઃ સ્વતત્ત્વં મૃગયેત ધીરઃ ॥ ૫૦૯॥

અહંસ્વરૂપા ચિતિરાત્મનો યા
સર્વોત્તમં ધ્યેયમિદં મુમુક્ષોઃ ।
મજ્જેદનેનૈવ મનો હૃદન્ત
ઇત્યસ્મદાચાર્યવરોપદેશઃ ॥ ૫૧૦॥

શાન્તિં નયન્ કેવલકુમ્ભકેન
ચિત્તં વિના પૂરકરેચકાભ્યામ્ ।
સજ્જેત ચેત્ સ્વાત્મગવેષયોગે
હૃન્મજ્જનં સ્યાન્મનસો મુમુક્ષોઃ ॥ ૫૧૧॥

દેહં પૃથક્કૃત્ય નિજસ્વરૂપે

વિશ્રમ્ય તિષ્ઠેદ્યદિ ચિત્સ્વરૂપે ।
અહમ્મતિસ્તસ્ય વિનાશમેતી-
ત્યેવં વસિષ્ઠો ભગવાનવોચત્ ॥ ૫૧૨॥

આત્માનમન્વિષ્ય મનઃ કયાઽપિ
શક્ત્યા ગૃહીતં હૃદયે નિમજ્જેત્ ।
તત્રાત્મનશ્ચિત્પ્રભયા નિગીર્ણં
મનોઽહમા સાકમુપૈતિ નાશમ્ ॥ ૫૧૩ ॥

શક્તિઃ કૃપાખ્યા ખલુ સા પરસ્ય
સત્યાત્મભૂતસ્ય હૃદિ સ્થિતસ્ય ।
વિદ્યામયી સા હિ સમર્પ્ય તસ્યૈ
સ્વમેવ સાધુર્ભવિતા કૃતાર્થઃ ॥ ૫૧૪॥

જ્ઞાનાગ્નિના વિશ્વમિદં પ્રદગ્ધં
સહાહમા યત્ર મહાશ્મશાને ।
ચિદ્વ્યોમ્નિ તત્રાહમહન્તયાઽઽત્મા
સદાશિવો નૃત્યતિ કેવલઃ સન્ ॥ ૫૧૫॥

તદેવ ચિદ્વ્યોમ હિ તત્સ્વરૂપં
નૃત્યેદસૌ તત્ર કથં ન્વરૂપઃ ।
આનન્દરૂપત્વમમુષ્ય દિષ્ટ-
મેવં હિ તન્નિશ્ચલનૃત્યમેવ ॥ ૫૧૬॥

ન તત્ર માયાઽસ્તિ ન કાઽપ્યવિદ્યા
ન દેશકાલૌ ન ચ કોઽપિ જીવઃ ।
તસ્મિન્ પદે નિર્મલચિત્સ્વરૂપ
આત્મૈક એવાસ્તિ ન કિઞ્ચિદન્યત્ ॥ ૫૧૭॥

માયાભિધાના પરમેશશક્તિઃ
સર્વં જગદ્યત્પરિણામ એવ ।
નષ્ટૈવ સેયં હ્યચલે પરસ્મિન્
સાકં સ્વકાર્યૈરપિ તુર્યભાવે ॥ ૫૧૮॥

વિભાત્યતસ્તુર્યપદે પ્રશાન્તે
સત્યાત્મરૂપં પ્રતિબન્ધહીનમ્ ।
તસ્મિન્ પદે સ્વાત્મતયાઽવશિષ્ટો
નિગદ્યતે મુક્ત ઇતિ પ્રબુદ્ધૈઃ ॥ ૫૧૯॥

સુદુઃખિતા સ્ત્રી શ્વશુરસ્ય ગેહે

માતુર્ગૃહે શાન્તિમુપૈતિ યદ્વત્ ।
એવં મનઃ સંસૃતિદુઃખતપ્તં
નિવૃત્ય મૂલં નિજમેવ શાન્તમ્ ॥ ૫૨૦॥

યથા નરઃ સ્વપ્નસમુત્થિતઃ સન્
સ્વાપ્નં જનં પશ્યતિ નૈવ કશ્ચિત્ ।
અજ્ઞાનનિદ્રોત્થિત એવમેકો
ન વીક્ષતે કશ્ચિદપિ સ્વતોઽન્યમ્ ॥ ૫૨૧॥

યસ્તન્મયાનન્દનિમગ્ન આસ્તે
સ્વાન્યસ્ય બોધેન વિનાઽદ્વયત્વે ।
પદં તદીયં સહજં પ્રશાન્તં
ધીગોચરત્વં ભજતાં કથં નુ ॥ ૫૨૨॥

વિનષ્ટચિત્તં નિજસત્યભાવે
વિનષ્ટદેહં ચ વિનષ્ટલોકમ્ ।
જ્ઞાતું પ્રબુદ્ધં ભવિતા સમર્થઃ
સ્વબુદ્ધિશક્ત્યૈવ કથં નુ મર્ત્યઃ ॥ ૫૨૩॥

અલક્ષણં તન્ન મનોઽપિ મન્તું
શક્નોતિ તુર્યં ન વચોઽપિ વક્તુમ્ ।
અતન્નિરાસેન તુ બોધયન્તિ
વેદાન્તવાચોઽપિ હિ તત્સ્વરૂપમ્ ॥ ૫૨૪॥

વાચાઽપિ વક્તું મનસાઽપિ મન્તું
શક્યં યદલ્પં ખલુ તત્સમસ્તમ્ ।
અગોચરત્વાન્મનસો ધિયોઽપિ
ભૂમેતિ જાનન્તિ તમાત્મનિષ્ઠાઃ ॥ ૫૨૫॥

યદ્યત્ પ્રબુદ્ધૈર્નિગમાન્તવાક્યૈઃ
સત્યં પરં પ્રત્યુપદિષ્ટમસ્તિ ।
તત્તત્ફલં શિષ્યમૃષાગ્રહાણાં
નિરાસ એવેતિ વદન્તિ બુદ્ધાઃ ॥ ૫૨૬॥

સીતા યથા દાશરથિં દિદેશ
નિષેધનાદન્યનૃપાત્મજાનામ્ ।
તથાત્મનો રૂપમતન્નિરાસૈ-
ર્વેદાન્તવાચઃ પ્રતિપાદયન્તિ ॥ ૫૨૭॥

અર્થો ન વેદ્યો ન ચ વેદનીયઃ

સ્વયમ્પ્રભઃ કેવલ એક આત્મા ।
તમો નિરાસેન વિના ન કિઞ્ચિત્
ગુરૂપદેશૈઃ ક્રિયતે હિ સાધોઃ ॥ ૫૨૮॥

જ્ઞાનાત્મકઃ સ્વો હિ તિરોહિતોઽજ્ઞૈઃ
પ્રાપઞ્ચિકજ્ઞાનમયૈસ્તમોભિઃ ।
તમાંસિ તાન્યેવ ગુરૂપદેશા
નિરસ્ય સાધું હિ કૃતાર્થયન્તિ ॥ ૫૨૯॥

યથાઽવકાશં જનયેન્ન કોઽપિ
નિરોધકાપાકરણં વિહાય ।
તથાઽઽત્મલાભાય ન કાર્યમન્ય-
દ્ધિત્વા મૃષાજ્ઞાનનિરાસમસ્તિ ॥ ૫૩૦॥

લબ્ધવ્ય આત્મા ભવિતા કથં નુ
નાસૌ વિનષ્ટઃ ખલુ તત્ત્વદૃષ્ટ્યા ।
યેનાહમાઽઽત્માઽસ્તિ તુ નષ્ટકલ્પો
નાશસ્તદીયો ભવિતાઽઽત્મલાભઃ ॥ ૫૩૧॥

પરા ચ પશ્યન્ત્યુત મધ્યમા ચ
વાગ્ વૈખરી ચેતિ ચતુઃપ્રકારા ।
સા વાક્ પરા નામ તુ મૌનમેવ
તદેવ રૂપં ચ સતઃ પરસ્ય ॥ ૫૩૨॥

વાગ્ વૈખરી મધ્યમવાક્પ્રસૂતા
વાગ્ વીક્ષમાણાઽસ્તિ તદીયમાતા ।
તસ્યાઃ પરા વાગિતિ સુપ્રસિદ્ધા
વાક્ સૈવ મૌનં પર ચિત્સ્વરૂપમ્ ॥ ૫૩૩॥

વ્યાખ્યા યથાર્થાઽપ્યુત મૌનમેવ
સ્થિતસ્ય બુદ્ધસ્ય પદે તુરીયે ।
વાગ્ વૈખરી ભેદમતિપ્રસૂતા
વદેત્ પરં તં કથમસ્તભેદમ્ ॥ ૫૩૪॥

અતો હિ મૌનેન દિદેશ રૂપ-
માત્મસ્વરૂપસ્ય ગુરુઃ પુરાણઃ ।
મૌનેન વાચો મનસોઽપિ પૂર્વે
શિષ્યા અબુધ્યન્ત તદીયરૂપમ્ ॥ ૫૩૫॥

ગુરોઃ પ્રબુદ્ધસ્ય હિ મૌનભાવાત્

स्वयं प्रबुद्धाश्च भवन्ति सन्तः ।
વાચોપદેશાઃ પ્રભવન્તિ નૈવ
તત્ત્વં પરં બોધયિતું યથાવત્ ॥ ૫૩૬॥

ગુરોઃ પ્રબુદ્ધસ્ય યદસ્તિ મૌનં
શક્તિસ્તદીયા ન હિ માનમેતિ ।
મૌનોપદેશઃ પરમો હિ તસ્માત્
તેનૈવ સાધોર્હિ મનઃપ્રશાન્તિઃ ॥ ૫૩૭॥

દીક્ષા ત્રિધોક્તા ગુરુણા પ્રયોજ્યા
નિરીક્ષણધ્યાનકરાભિમર્શાઃ ।
ગુરોસ્તુ મૌનસ્થિતિસમ્પ્રયુક્તાં
બ્રવીતિ દીક્ષાં પરમાં ગુરુર્નઃ ॥ ૫૩૮॥

મૌનોપદેશાદપિ મૌનભાવે
સ્થિત્વૈવ લભ્યા ભવતીત્યતશ્ચ ।
મૌનં પદં તં નિગદન્તિ બુદ્ધા
મૌની વદન્નેવ સ સમ્પ્રબુદ્ધઃ ॥ ૫૩૯॥

સકૃદ્વિભાતં પદમવ્યં ત-
ચ્ચૈતન્યભાનોઃ પ્રભયૈવ તસ્ય ।
અતઃ પ્રમાદાચ્ચ્યુતિરાત્મભાવા-
ન્ન બુદ્ધપુંસો ભવિતા કદાચિત્ ॥ ૫૪૦॥

અત્તા સમસ્તસ્ય ચરાચરસ્યા-
પ્યાત્મેતિ વેદાન્તગિરા યદુક્તમ્ ।
નિર્દિશ્યતે તેન તદીયભાસા
ગ્રાસોઽસ્ય વિશ્વસ્ય તમોમયસ્ય ॥ ૫૪૧॥

નિગીર્ય સર્વં ઘનવિશ્વરૂપં
ચૈતન્યભાસા નિજયા પરાત્મા ।
એકોઽદ્વયો ભાત્યરુણાચલેશ
ઇતિ સ્વરૂપં ગુરુણાઽસ્તિ ગીતમ્ ॥ ૫૪૨॥

બ્રહ્માત્મભાવં પ્રતિપદ્ય તુર્યે
વિમુચ્યતે સ્વો ભવબન્ધપાશાત્ ।
ઇત્યેષ વાદો ન ભવેદ્યથાર્થો
નહિ સ્વરૂપાચ્ચ્યુતિરાત્મનોઽભૂત્ ॥ ૫૪૩ ॥

ન શ્વેતિમાનં નવમેતિ ધૌતં

વસ્ત્રં સ્વભાવો હ્યયમસ્ય યદ્વત્ ।
બ્રહ્મત્વમાત્મા નહિ યાતિ બોધાદ્
બ્રહ્મત્વમાત્મપ્રકૃતિર્હિ નિત્યઃ ॥ ૫૪૪॥

બ્રહ્મજ્ઞ આત્મજ્ઞ ઇતિ પ્રસિદ્ધે
બુદ્ધસ્ય પુંસો ભવતોઽભિધે દ્વે ।
બ્રહ્મૈવ ચાત્મૈવ યતઃ સ બુદ્ધો
જ્ઞાતે ઉભે તેન કથં ભવેતામ્ ॥ ૫૪૫॥

અબ્રહ્મતાધીરહિતત્વમેવ
બ્રહ્મજ્ઞતોક્તા ન તુ કાચિદન્યા ।
આત્મજ્ઞતા નામ ભવેદનાત્મ-
ન્યાત્મત્વમત્યા રહિતત્વમેવ ॥ ૫૪૬॥

તત્ત્વં સ્વમન્વિષ્ય પરસ્ય તસ્ય
સત્યાત્મનોઽનન્યત્વમુપેત્ય તુર્યે ।
કથં નુ તસ્માન્નિજસત્સ્વરૂપાત્
તિષ્ઠેત્ પૃથક્ કશ્ચન બુદ્ધનામા ॥ ૫૪૭॥

અદ્વૈતનિષ્ઠામનુભૂય તુર્યે
જીવેત્ પૃથક્ત્વેન કથં પરસ્માત્ ।
તદ્ બ્રહ્મનિર્વાણમુદીરિતં હિ
કૃષ્ણેન સાક્ષાત્ પરમેણ પુંસા ॥ ૫૪૮॥

નિર્દિશ્યતે બ્રહ્મ યથૈવ શાસ્ત્રે
નિર્દિશ્યતે બુદ્ધપુમાંસ્તથૈવ ।
બ્રહ્મસ્વરૂપં ખલુ સંવિદેવ
બુદ્ધસ્વરૂપં ન તતોઽસ્તિ ભિન્નમ્ ॥ ૫૪૯॥

નાત્મદ્વયં કસ્યચિદસ્તિ યસ્માત્
તદ્ વેદ્મિ મામિત્યપિ નેતિ હાસ્યે ।
વેદ્યત્વમાત્મા ન કદાઽપિ યાતી-
ત્યેષાઽસ્તિ વાણી ભગવત્તમસ્ય ॥ ૫૫૦॥

અદ્વૈતનિષ્ઠેત્યુદિતાઽસ્તિ સેય-
મુપાધિનિર્મુક્તનિજસ્વરૂપે ।
યતો ન તસ્માત્ પૃથગસ્તિ પૂર્ણં
બ્રહ્માભિધાનં પરસત્યમેકમ્ ॥ ૫૫૧॥

અદ્વૈતતા સા વિદુષાઽનુભૂતા

सत्यात्मनस्तुर्यपदाधिगत्या ।
न साधनाभ्यासबलेन सिद्धा
सत्यात्मनः सा खलु नित्यसिद्धा ॥ ५५२॥

द्वैतं भवेत् सत्यमिदं हि तावद्
यावद् भवेत् साधनतत्परत्वम् ।
सिद्धौ भवेदद्वयतोद्वस्तु
द्वैतप्रणाशादिति केचिदाहुः ॥ ५५३ ॥

नेमे विजानन्ति तु तुर्यतत्त्वं
कालातिगं चानुदितप्रपञ्चम् ।
अद्वैतमाद्यन्तविवर्जितं हि
द्वैतं सदिक्कालमसत् सदैव ॥ ५५४॥

मिथ्याभ्रमस्यैव विराम उक्तः
शास्त्रे मुमुक्षोरहमो विनाशात् ।
सत्यं न बोधेन विनाशमीया-
न्न भासते किञ्चिदसत् तुरीये ॥ ५५५॥

द्वैतं भवेत् सत्यमिदं सदैव
ज्ञानेऽपि नैवास्य भवेद्विनाशः ।
अद्वैतसिद्धिर्न भवेत् कदाऽपी-
त्येष मतिर्दूरतरैव साधोः ॥ ५५६॥

सत्या सदैवाद्वयताऽऽत्मनोऽसौ
स्वान्वेषणे सत्यपि चात्मलाभे ।
लब्ध्वोऽभवद्यो दशमो गवेषात्
पूर्वं च सोऽयं दशमो हि नान्यः ॥ ५५७॥

जानन्त्यजातिं परवस्तुनो ये
माण्डूक्यवेदान्तनिरूप्यमाणाम् ।
तत्त्वे परे निश्चितबुद्धयस्ते
मुह्यन्ति नैतादृशमुग्धवादैः ॥ ५५८॥

न भीतिकामौ भवतोऽद्वयत्वे
स्थितस्य बुद्धस्य यथाऽज्ञपुंसः ।
द्वैतेक्षया मोहितमानसानां
नृणामुभे कामभयेऽनिवार्ये ॥ ५५९॥

भीतिर्द्वितीयाद्धि भवेदितीदं

ભીત્યાસ્પદં દ્વૈતમિદં પ્રદિષ્ટમ્ ।
ભેદપ્રતીત્યા મુષિતાત્મભાવો
નાત્યેતિ ભીતિં ખલુ કોઽપિ જન્તુઃ ॥ ૫૬૦॥

વિદ્વાનગમ્યે મનસોઽપિ વાચા-
માનન્દરૂપાત્મનિ મોદમાનઃ ।
બિભેત્યસૌ નૈવ કુતશ્ચનેતિ
શ્રુત્યોદિતા નિશ્ચલતા તુરીયે ॥ ૫૬૧॥

નોદેતિ કામોઽપિ હિ કોઽપિ તુર્યે
મૃતો હ્યયં કામયિતાઽહમાખ્યઃ ।
સર્વાંશ્ચ કામાન્ સમકાલમેવ
લબ્ધ્વેવ બુદ્ધોઽસ્તિ હિ નિત્યતૃપ્તઃ ॥ ૫૬૨॥

આત્મૈવ સર્વં હિ તદીયલાભે
લબ્ધવ્યમન્યન્ન હિ કિઞ્ચિદસ્તિ ।
તદાપ્તકામો ગદિતોઽપ્યકામઃ
શાસ્ત્રે પ્રબુદ્ધોઽસ્તિ હિ યદ્વદીશઃ ॥ ૫૬૩ ॥

સાક્ષાત્કૃતં યેન નિજં સ્વરૂપં
સ કસ્ય કામાય ચ કિં સમિચ્છન્ ।
તપ્યેત દેહાત્મધિયેતિ વક્તિ
બુદ્ધસ્ય કામાનુદયં શ્રુતિર્હિ ॥ ૫૬૪॥

દેહાત્મના સંસ્થિત એવ કામી
બુદ્ધસ્તુ દેહાત્મધિયા વિમુક્તઃ ।
સ્વકં શરીરં સમવૈતિ બુદ્ધઃ
શરીરમન્યસ્ય યથા તથૈવ ॥ ૫૬૫॥

સુખસ્ય નાસ્વાદનમસ્તિ તુર્યે
સુખિત્વદુઃખિત્વમતી ન તત્ર ।
સુખસ્ય દુઃખસ્ય વિલક્ષણં તત્
તુર્યં પદં દ્વન્દ્વવિવર્જિતત્વાત્ ॥ ૫૬૬॥

ન શિષ્યતે કશ્ચન તત્ર કોશઃ
સ્વરૂપસઙ્કોચકરોઽજ્ઞપુંસામ્ ।
અખણ્ડ આત્મા નિરુપાધિકો હિ
વિરાજતે તત્ર વિયત્સમાનઃ ॥ ૫૬૭॥

નિર્વાણસઞ્જ્ઞાં સુગતો ગુરુર્યાં

દિદેશ નિષ્ઠાં ભવદુઃખહન્ત્રીમ્ ।
કોશે સમસ્તે ગલિતે તુરીયે
પદે સ્થિતિઃ સેતિ ગુરુર્જગાદ ॥ ૫૬૮॥

ન સંશયાનામુદયોઽસ્તિ તત્ર
પુમાન્ પ્રબુદ્ધઃ સ્થિતધીર્હિ નિત્યમ્ ।
આસ્તે સ સઙ્કલ્પવિકલ્પહીનઃ
પ્રશાન્તગમ્ભીરતયાઽસ્તચેતાઃ ॥ ૫૬૯॥

Quote - Upanishad
ભિદ્યતે હૃદયગ્રન્થિઃ છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્ દૃષ્ટે પરાવરે ॥

આદ્યન્તહીનં સ્વમવેત્ય બોધાત્
સ મૃત્યુમત્યેત્યપિ સમ્પ્રબુદ્ધઃ ।
પુમાનબુદ્ધ્વાઽમૃતમાત્મતત્ત્વં
નાત્યેતિ મૃત્યું બત કોઽપિ લોકે ॥ ૫૭૦॥

લેભે જનિં યઃ પરમે સ્વમૂલે
વિચાર્ય કસ્માદહમિત્યુદારઃ ।
સ એવ જાતઃ સ ચ નિત્યજાતો
નવો નવોઽયં સતતં મુનીન્દ્રઃ ॥ ૫૭૧॥

ઇત્યેવમાચાર્યવરેણ દિષ્ટા
બ્રહ્માત્મભાવે સહજે સ્થિતસ્ય ।
નિષ્ઠા પરા સર્વવિકારહીના
નિરામયા કાલદિગાદ્યતીતા ॥ ૫૭૨॥

અજ્ઞસ્ય લોકે મરણાય જન્મ
મૃતિસ્તદીયા જનનાય ભૂયઃ ।
તસ્માદિમે જન્મમૃતી મૃષૈવે-
ત્યસ્મભ્યમુક્તં ભગવત્તમેન ॥ ૫૭૩ ॥

મૃતિર્યથાર્થા ત્વહમો વિનાશો
જનિર્યથાર્થા સહજાત્મનિષ્ઠા ।
દ્વન્દ્વૈર્વિમુક્તં પદમવ્યં તદ્
યત્રૈકતાં જન્મમૃતી ભજેતે ॥ ૫૭૪॥

અદ્વૈતભાવે સ્થિતિમેત્ય નિત્યાં
ભેદાન્ કથં પશ્યતુ સમ્પ્રબુદ્ધઃ ।

ભેદાકુલં ભાતિ યદજ્ઞપુંસાં
   વિશ્વં તદાત્મૈવ હિ બુદ્ધપુંસઃ ॥ ૫૭૫॥

અભેદદૃષ્ટિઃ સમદર્શનં ચે-
   ત્યેતદ્ દ્વયં યદ્ વિદુષો વદન્તિ ।
તદ્ ભેદદૃષ્ટ્યા રહિતત્વમેવ
   ન કેવલત્વે ખલુ વીક્ષણાનિ ॥ ૫૭૬॥

સ્વમેવ સર્વત્ર ચ નિત્યબુદ્ધં
   બુદ્ધઃ પુમાન્ પશ્યતિ ન સ્વતોઽન્યમ્ ।
તન્મન્યતેઽજ્ઞં કમપીહ નાસૌ
   સર્વે પ્રબુદ્ધા હિ તદીયદૃષ્ટ્યા ॥ ૫૭૭॥

યથા ચરેત્ કશ્ચન સુપ્ત એવ
   તથૈવ બુદ્ધો જગતિ ક્રિયાસુ ।
દૃશ્યેત જાનન્નિવ લોકભેદાન્
   ભેદાનજાનન્નપિ સર્વદૈવ ॥ ૫૭૮॥

બુદ્ધસ્ય ચાજ્ઞસ્ય ભિદા સ્ફુટાસ્યા-
   ન્નિન્દા નુતિશ્ચેત્યુભયોશ્ચ દૃશ્યા ।
દ્વયોર્ન ભેદં સમવૈતિ બુદ્ધો
   દ્વન્દ્વં મૃષેદં ખલુ યદ્વદન્યત્ ॥ ૫૭૯॥

વિજ્ઞાય વેદાન્તનિગૂઢમર્થં
   વિહાય વિશ્વં તૃણવત્ સમસ્તમ્ ।
અપ્રાપ્ય નિષ્ઠાં નિજસત્યભાવે
   સ્વસ્યૈવ તત્ત્વસ્ય ગવેષણેન ॥ ૫૮૦॥

અલુપ્તદેહાત્મમતિર્વિમુહ્યન્
   યઃ સત્યવજ્જીવભિદામવૈતિ ।
યાત્યેવ સોઽયં હ્યવશોઽપિ દાસ્યં
   વારાઙ્ગનાયા નુતિનામિકાયાઃ ॥ ૫૮૧॥

કમપ્યજાનન્ પુરુષં સ્વતોઽન્ય-
   મપ્રચ્યુતઃ સ્વીયપદાત્ પ્રબુદ્ધઃ ।
નિન્દાનુતિભ્યાં ન વિકારમેતિ
   નિન્દા નુતિર્વા સ્વકૃતેવ તસ્મૈ ॥ ૫૮૨॥

દેહીવ મર્ત્યઃ પરિદૃશ્યમાનો
   નાસૌ શરીરી નિરહઙ્કૃતિર્યત્ ।

સૂક્ષ્મં વપુસ્તસ્ય ન દેહપાતે
  નિર્યાતિ કિન્તુ પ્રવિલીયતેઽત્ર ॥ ૫૮૩ ॥

સત્યં પ્રપઞ્ચં બત મન્યમાના
  રૂપં પ્રબુદ્ધસ્ય વદન્તિ કેચિત્ ।
તસ્યેચ્છયાઽરૂપિણ એવ રૂપં
  કદાચન સ્યાદિતિ કેચિદાહુઃ ॥ ૫૮૪॥

રૂપસ્ય સર્વસ્ય નિદાનભૂતા
  નષ્ટા હ્યહન્તા નિજતત્ત્વબોધાત્ ।
રૂપાણ્યતોઽસન્તિ હિ બુદ્ધપુંસ-
  સ્તન્મુગ્ધતૈષા બત રૂપવાર્તા ॥ ૫૮૫॥

અભૂદિદં પૂર્વમથ પ્રણષ્ટ-
  મિત્યેવમુક્તિશ્ચ ન યુજ્યતે યત્ ।
રૂપી ન કોઽપ્યસ્તિ હિ તત્ત્વદૃષ્ટ્યા
  રૂપી પ્રબુદ્ધો ભવિતા કથં નુ ॥ ૫૮૬॥

ભાવે તુરીયે સહજે સ્થિતસ્ય
  બુદ્ધસ્ય દેહત્રિતયં વિનૈવ ।
ઇચ્છાઽપિ રૂપગ્રહણે કથં સ્યાત્
  સેયં વૃથા પામરરઞ્જની વાક્ ॥ ૫૮૭॥

નદી યથા વારિધિમેત્ય તસ્મિન્
  હિત્વા નદીરૂપમુપૈત્યભેદમ્ ।
એવં પ્રબુદ્ધોઽપિ વિહાય રૂપં
  પરાત્પરે પુંસિ ભજત્યભેદમ્ ॥ ૫૮૮॥

એવં શ્રુતિર્વક્તિ હિ રૂપહાના-
  દૈક્યં પરસ્મિન્ વિદુષસ્તુરીયે ।
જીવન્વિમુક્તોઽપ્યશરીર એવ
  શરીરિણં સ્વં ન હિ મન્યતેઽસૌ ॥ ૫૮૯॥

બુદ્ધસ્ય રૂપં પ્રતિ યોઽહમાખ્યો
  વાદી ભવેત્ તસ્ય વિનાશ એવ ।
બ્રવીતિ મુક્તિં ભગવાન્ ગુરુર્ય-
  ન્નિરર્થકોઽયં બત રૂપવાદઃ ॥ ૫૯૦॥

અતો ન નિર્યાતિ હિ દેહપાતે

સૂક્ષ્મં વપુસ્તસ્ય યથાઽજ્ઞપુંસામ્ ।
વિલીયતેઽત્રૈવ હિ તત્ સ્વમૂલે
ન શિષ્યતે કિઞ્ચન નિર્ગમાય ॥ ૫૯૧॥

પ્રબુદ્ધપુંસાં બહુતાઽપિ મર્ત્યૈઃ
પ્રતીયમાના ન ભવેદ્યથાર્થા ।
પ્રાપઞ્ચિકા એવ હિ સર્વભેદા
ન નિષ્પ્રપઞ્ચે ખલુ તે ભવન્તિ ॥ ૫૯૨॥

બુદ્ધઃ પુમાનેષ મયાઽદ્ય દૃષ્ટો
દ્રક્ષ્યામ્યતોઽન્યાનપિ બુદ્ધપુંસઃ ।
ઇતિ બ્રુવાણો વિદુષાં સ્વરૂપં
ન વેત્તિ સચ્ચિત્સુખરૂપમેકમ્ ॥ ૫૯૩ ॥

અજાનતઃ સ્વં બત બુદ્ધમન્ત-
ર્વિભાન્તિ બુદ્ધા બહવો વિભિન્નાઃ ।
તં સ્વાત્મભૂતં સમવૈતિ યસ્તુ
ન તસ્ય નાનાત્વમિદં યથાર્થમ્ ॥ ૫૯૪॥

આદ્યો ગુરુર્યો મુનિસત્તમાનાં
દિદેશ મૌનેન પરં પદં સ્વમ્ ।
પશ્ચાચ્ચ યઃ શઙ્કરદેશિકેન્દ્રઃ
સ એવ હિ શ્રીરમણો ગુરુર્નઃ ॥ ૫૯૫॥

યન્નિત્યસિદ્ધં નિજતત્ત્વમન્ત-
સ્તદાત્મના સુસ્થિતિરેવ તુર્યે ।
સિદ્ધિર્યથાર્થા ન તુ કાચિદન્યે-
ત્યસ્મદ્ગુરુઃ શ્રીરમણો બ્રવીતિ ॥ ૫૯૬॥

લબ્ધવ્ય આત્મેતિ મતિર્ન સત્યા
નાસૌ વિનષ્ટઃ ખલુ તત્ત્વદૃષ્ટ્યા ।
વદન્તિ બુદ્ધા અત એવ સત્યં
તં નિત્યસિદ્ધં નિખિલસ્ય જન્તોઃ ॥ ૫૯૭॥

ભૂમાનમાત્માનમતોઽન્યદલ્પં
શ્રુતિર્વદન્તી દિશતીમમર્થમ્ ।
વિક્રીય તં વિશ્વમિદં સમસ્તં
ક્રીત્વાઽપિ મર્ત્યઃ કૃપણો હિ શોચ્યઃ ॥ ૫૯૮॥

અતો હ્યકાર્પણ્યપદં તુરીયં

કાર્પણ્યમન્યચ્છ્રુતયો વદન્તિ ।
પૂર્ણો હિ સમ્રાડિવ સમ્પ્રબુદ્ધો
ભિક્ષામટંશ્ચાપિ ન દૈન્યમેતિ ॥ ૫૯૯॥

વદન્તિ સિદ્ધીરણિમાદિકાંસ્તુ
બહિર્મુખા ભોગપરા વિમૂઢાઃ ।
વક્તિશ્રુતિર્મન્દધિયાં કથઞ્ચિત્
પ્રરોચનાર્થં બત તાશ્ચ સિદ્ધીઃ ॥ ૬૦૦॥

આવિદ્યકાઃ સ્વપ્નસમાઃ યતસ્તા
ન તાસુ મોહં ભજતે વિવેકી ।
પૂર્ણસ્તુરીયે સ્થિતિમેત્ય સત્યે
બુદ્ધો ન મુહ્યેદનૃતાસુ તાસુ ॥ ૬૦૧ ।
ઇત્યાત્મલાભસ્ય સમોઽન્યલાભો
નાસ્તીતિ બુદ્ધૈઃ પ્રકટીકૃતેઽપિ ।
મત્વાઽઽત્મનાશસ્ય પદં તુરીયં
બિભ્યત્યમુષ્માદવિવેકિનસ્તુ ॥ ૬૦૨ ॥।

પ્રયાન્તિ વૃદ્ધિં વિદુષસ્તુરીયે
સ્થિતસ્ય તેજો ધિષણા બલં ચ ।
યથા વસન્તસ્ય સમાગમેન
સૌન્દર્યમુખ્યાઃ સુગુણાસ્તરૂણામ્ ॥ ૬૦૩ ॥

શમાદિકા યે સુગુણા મુમુક્ષો-
ર્યત્નેન સમ્પાદ્ય ચ રક્ષણીયાઃ ।
સ્વાભાવિકાસ્તે વિદુષો ભવન્તિ
સ નિર્ગુણઃ સદ્ગુણશેવધિશ્ચ ॥ ૬૦૪॥

નાશેઽહમસ્તન્ન હિ કાઽપિ નષ્ટિ-
ર્નૈવાત્મનાશસ્ય પદં તુરીયમ્ ।
અહન્તયાઽઽત્માઽસ્તિ તુ નષ્ટકલ્પો
નાશેઽહમો નશ્યતિ નષ્ટિરેષા ॥ ૬૦૫॥

એષોઽન્તતોઽહઙ્કૃતિનાશ એવ
ધર્માર્થકામા અપિ સત્યવાણી ।
સન્ન્યાસમૌને ચ તપોઽપિ યોગઃ
સત્યં પરસ્મૈ સ્વનિવેદનં ચ ॥ ૬૦૬॥

ભવન્ત્યસત્યાનિ તદાખ્યકાનિ

વપુષ્યહન્તામલિનીકૃતાનિ ।
સ્વાભાવિકાન્યેવ ભવન્તિ તાનિ
સ્થિતસ્ય સત્યાત્મતયા તુરીયે ॥ ૬૦૭॥

અલઙ્કૃતી દ્વે વિદુષો નિરુક્તે
કર્તવ્યહાનિઃ કૃતકૃત્યતા ચ ।
અજ્ઞાનમૂલં હ્યુભયં નરસ્ય
કર્તવ્યતા ચાપ્યકૃતાર્થતા ચ ॥ ૬૦૮॥

ન કર્મસાધ્યં વિદુષોઽસ્તિ યસ્માત્
કિઞ્ચિન્ન કર્તવ્યમિહાસ્તિ તસ્ય ।
કર્તવ્યમત્રાસ્તિ તુ યસ્ય કિઞ્ચિત્
સ મોહપાશૈર્બત બદ્ધ એવ ॥ ૬૦૯॥

પૃચ્છન્તિ કેચિત્ કિમુ બુદ્ધપુંસો
ધ્યાનં ન કાર્યં ભવતીતિ મુગ્ધાઃ ।
ગત્વા વિદેશાન્ નનુ શિક્ષણીયા
બુદ્ધેન મર્ત્યા ઇતિ પૃચ્છ્યતેઽન્યૈઃ ॥ ૬૧૦॥

અહં તદસ્મીત્યનુસન્દધાનો
ભવેન્ન બુદ્ધઃ ખલુ સાધકોઽસૌ ।
ધ્યાનં તદસ્મીતિ તુ બુદ્ધપુંસા
ધ્યાનં નરોઽસ્મીતિ યથા નરેણ ॥ ૬૧૧॥

યદ્વિસ્મૃતં તત્સ્મૃતિરેવ યુક્તા
નાવિસ્મૃતસ્ય સ્મૃતિરસ્તિ લોકે ।
ન વિસ્મૃતં યદ્ વિદુષાઽઽત્મતત્ત્વં
તસ્ય સ્મૃતિસ્તેન કથં ઘટેત ॥ ૬૧૨॥

ધ્યાનં યથાર્થં તુ સતઃ પરસ્ય
નિષ્ઠૈવ ચિન્તારહિતાત્મભાવે ।
નિરન્તરં ધ્યાનમિદં ન હાતું
શક્યં ન કર્તું વિદુષા કદાઽપિ ॥ ૬૧૩ ॥

ક્વચિત્ પ્રદેશે સ્થિતવત્ પ્રબુદ્ધઃ
સન્દૃશ્યમાનોઽપિ વિયત્સમોઽસૌ ।
તિષ્ઠન્ સદા સ્વે સહજે સમાધૌ
વ્યાપ્નોતિ શક્ત્યા ભુવનં સમસ્તમ્ ॥ ૬૧૪॥

અવત્યસૌ સ્વાનતિદૂરતશ્ચા-

ણ્યચિન્ત્યશક્ત્યા નિજયા પ્રબુદ્ધઃ ।
વિનૈવ ચિન્તાં સહજે સમાધૌ
સ્થિતોઽપિ સન્ સન્તતમસ્તચિત્તઃ ॥ ૬૧૫॥

કરોતિ ચિન્તાં કિમુ કોઽપિ નૃણાં
સ્વપ્નેક્ષિતાનાં મનુજઃ પ્રબુધ્ય ।
તથાઽજ્ઞનૃણાં ન કરોતિ ચિન્તાં
સ્વાજ્ઞાનનિદ્રોત્થિત આત્મબોધાત્ ॥ ૬૧૬॥

ગુણાનસૌ ત્રીનતિવર્તતે ય-
દતો ન દોષાઃ પ્રભવન્તિ તસ્મિન્ ।
કર્માત્ર યદ્યત્ કુરુતે પ્રબુદ્ધ-
સ્તત્તદ્ ભવિષ્યત્યનવદ્યમેવ ॥ ૬૧૭॥

અત્યેતિ શાસ્ત્રાણ્યત એવ બુદ્ધો
નિબધ્યતે તૈર્ન હિ નિર્મનસ્કઃ ।
ભવન્ત્યવિદ્વદ્વિષયાણિ તાનિ
તે હ્યેવ કર્તૃત્વધિયા વિધેયાઃ ॥ ૬૧૮॥

પ્રતિષ્ઠિતો યત્ર પદે પ્રબુદ્ધો
ભવન્ત્યવેદાઃ ખલુ તત્ર વેદાઃ ।
દેવા અદેવા ઇતિ તસ્ય ભાવો
નિર્દિશ્યતે હિ શ્રુતિશીર્ષવાચા ॥ ૬૧૯॥

બુદ્ધોપદેશાન્ મનુજોઽનુતિષ્ઠેદ્
બુદ્ધૈઃ કૃતં કર્મ તુ નાનુતિષ્ઠેત્ ।
બુદ્ધોપદેશાઃ પરમં પ્રમાણં
ન કર્મ તેષાં તુ તથા પ્રમાણમ્ ॥ ૬૨૦॥

સર્વાંશ્ચ યોગાનતિગત્ય તિષ્ઠન્
તુર્યેઽચ્યુતો બુદ્ધપુમાન્ ભવેઽત્ર ।
યોગીવ વા ભોગિવદેવ વા સ્યાત્
તૌ યોગભોગૌ ભવતો ન સત્યૌ ॥ ૬૨૧॥

શિષ્યોપદેશે સમુદીરિતે દ્વે
બન્ધો વિમુક્તિર્ભવતો ન સત્યે ।
દ્વન્દ્વાનિ સર્વાણિ મૃષેતિ સિદ્ધે
દ્વન્દ્વં તદેતત્ કથમસ્તુ સત્યમ્ ॥ ૬૨૨॥

આત્મા સ્વયં નિત્યવિમુક્ત એવ

બદ્ધસ્ત્વવિદ્યોદિત જીવ એવ ।
તત્ તત્ત્વતો નાસ્તિ હિ કાઽપિ મુક્તિ-
ર્બન્ધપ્રતીત્યૈવ હિ મુક્તિચિન્તા ॥ ૬૨૩ ॥

કસ્યાસ્તિ બન્ધોઽયમિતિ સ્વતત્ત્વં
મુમુક્ષુરન્વિષ્યતિ ચેત્ તદન્તે ।
આત્માઽનુભૂયેત હિ નિત્યમુક્ત
ઇત્યસ્તિ વાણી ભગવત્તમસ્ય ॥ ૬૨૪॥

અજાતિરેવ પ્રકટીકૃતા હિ
શ્રુત્યાઽપિ બુદ્ધેશ્ચ સતઃ પરસ્ય ।
તસ્યૈવ સત્યાત્મતયા સ્થિતત્વાત્
સ બન્ધમાપેતિ કથં નુ વાચ્યમ્ ॥ ૬૨૫॥

સત્યો હિ બન્ધો યદિ નાન્તમીયા-
દનાદિરઙ્ગીક્રિયતે હિ બન્ધઃ ।
સાન્તાદિમત્વાચ્ચ ભવેદ્વિમુક્તિ-
ર્બન્ધસ્ય મિથ્યાત્વમતોઽનિવાર્યમ્ ॥ ૬૨૬॥

બદ્ધોઽભવં પૂર્વમથાસ્મિ મુક્ત
ઇત્યેવમુક્તિં શૃણુમો ન બુદ્ધાત્ ।
કાલાતિગા સા પદવી હિ તુર્યા
ચિન્ત્યં ભવેજ્જન્મ કથં તદીયમ્ ॥ ૬૨૭॥

નૈવાગતં કિઞ્ચન મત્સ્વરૂપે
સદૈકધૈવાસ્મિ વિકારહીનઃ ।
ઇત્યેવમૂચે ભગવાન્ હિ પૃષ્ટો
લબ્ધા વિમુક્તિર્ભવતા કદેતિ ॥ ૬૨૮॥

પુર્યાં સતાં પણ્ઢરિનામિકાયાં
યામઃ કદા તામિતિ ગીતમાદૌ ।
પ્રાપ્તા વયં તામિતિ ગીતમન્તે
યદ્વત્ તથૈવેહ વિમુક્તિવાર્તા ॥ ૬૨૯॥

સ્વપ્ને ભ્રમિત્વા સ્વગૃહં નિવૃત્ય
ભૂયોઽપિ તત્રૈવ ગતઃ સુષુપ્તિમ્ ।
પ્રબુધ્ય પશ્યેત્ સ્વગૃહે યથા સ્વં
મુક્તિસ્તથૈવેતિ ગુરુર્જગાદ ॥ ૬૩૦॥

નિત્યાનુભૂતે મમ સત્સ્વરૂપે

स्थितोऽस्मि मिथ्या ह्यनुभूतयोऽन्याः ।
इति प्रबोधेन मतिप्रसादो
भवेद्विमुक्तिर्न किमप्यपूर्वम् ॥ ६३१॥

बुद्धस्य नित्यो महिमाऽस्ति सोऽयं
वृद्धिक्षयौ तस्य न कर्मणेति ।
अनिष्टमिष्टं च फलं कृतस्य
न कर्मणः स्याद्विदुषः कदाऽपि ॥ ६३२॥

यथा कथासंश्रवणे सुदूरं
धिया गतो नैव कथां शृणोति ।
कर्माणि कुर्वन्नपि बुद्ध एवं
निर्वासनत्वान्मनसो न कर्ता ॥ ६३३॥

सवासनत्वान्मनसस्तु कर्ता
भवत्यकुर्वन्नपि चाज्ञमर्त्यः ।
स्वप्ने यथाऽद्रेः शिखरादधस्तात्
पतेच्छरीरे सति निश्चलेऽपि ॥ ६३४॥

शरीरमात्रेण कृतं न कर्म
मनःकृतं यत् तु तदेव कर्म ।
नाचेतनं कर्तृ भवेच्छरीरं
मनो भवेत् कर्तृ तु चेतनत्वात् ॥ ६३५॥

प्रारब्धवेगेन चरन्ति कर्म
देहेन्द्रियप्राणमनांसि यद्यत् ।
न लिप्यते तेन पुमान् प्रबुद्ध
इत्युक्तवान् श्रीभगवान् गुरुर्नः ॥ ६३६॥

न लिप्यते सृष्ट्यवनादि कर्म
कुर्वन्नपीशः खलु तद्वदेव ।
न लिप्यते कर्मभिरत्र बुद्धो
भिदा तयोर्नास्ति हि तत्त्वदृष्ट्या ॥ ६३७॥

अश्नंश्च गच्छंश्च वदन् स्मरंश्च
कर्माणि कुर्वन्निव लक्ष्यतेऽज्ञैः ।
कर्ताऽपि भोक्ता न तु तत्त्वतोऽसौ
स हीश्वराधीनसमस्तवृत्तिः ॥ ६३८॥

कर्ता यदि स्वः स भवेद्धि भोक्ता

કર્તૃત્વનાશે નિજમાર્ગણેન ।
સાકં વિનશ્યેત્ ત્રિવિધં ચ કર્મ
વિમુક્તિમેતાં સમવેહિ નિત્યામ્ ॥ ૬૩૯॥

ભુઙ્ક્તે યથા નિદ્રિતબાલકોઽન્નં
સ્વમાતૃદત્તં ન તુ વેત્તિ ભુક્તમ્ ।
એવં પ્રબુદ્ધોઽપિ હિ કર્મજન્યં
ભુઙ્ક્તે ફલં ભોક્તૃતયા વિનૈવ ॥ ૬૪૦॥

કર્તા ન કોઽપ્યસ્તિ હિ તત્ત્વદૃષ્ટ્યા
સ્વજ્ઞાજ્ઞયોરસ્તિ ભિદેયમેવ ।
કર્તાઽહમસ્મીત્યભિમન્યતેઽજ્ઞો
બુદ્ધસ્ય નોદેતિ તુ કર્તૃતાધીઃ ॥ ૬૪૧॥

આગામિકર્માણ્યપિ સઞ્ચિતાનિ
નશ્યન્તિ બુદ્ધસ્ય પુનર્ન જન્મ ।
પ્રારબ્ધકર્મ ત્વવશિષ્ટમસ્તી-
ત્યુક્તિર્ન સત્યા પરમાર્થદૃષ્ટ્યા ॥ ૬૪૨॥

યથા મૃતે ભર્તરિ સત્યમુષ્ય
શિષ્યેત ભાર્યાઽવિધવા ન કાઽપિ ।
એવં મૃતે કર્તરિ નૈવ કર્મ
ફલપ્રદં કિઞ્ચન શિષ્ટમસ્તિ ॥ ૬૪૩ ॥

યથા પ્રબોધે સતિ નૈવ કર્મ
સ્વપ્ને કૃતં કિઞ્ચન શિષ્ટમસ્તિ ।
કર્માજ્ઞતાયાં ચરિતં તથૈવ
સત્યાત્મબોધે સતિ નાસ્તિ શિષ્ટમ્ ॥ ૬૪૪॥

પ્રારબ્ધમસ્તીતિ વચઃ શ્રુતીનાં
ભવેદિદં ત્વજ્ઞધિયોઽનુરોધઃ ।
તદીયદૃષ્ટ્યા ફલમસ્તિ તસ્ય
બુદ્ધઃ શરીરી બત તન્મતેન ॥ ૬૪૫॥

પ્રિયાપ્રિયે ન સ્પૃશતો હિ બુદ્ધં
દેહં વિનૈવ સ્થિતમાત્મભાવે ।
નૈષ્ફલ્યમેવં વિદુષઃ કૃતીનાં
વેદાન્તવાચૈવ નિરુક્તમસ્તિ ॥ ૬૪૬॥

કૃત્તેઽપિ દગ્ધે વિદુષઃ શરીરે

च्युतिर्न तस्यास्ति निजस्वरूपात् ।
યથા ગુડં ચૂર્ણિતમગ્નિતપ્તં
ત્યજેન્ન માધુર્યરસં સ્વકીયમ્ ॥ ૬૪૭॥

સદેહમુક્તિશ્ચ વિદેહમુક્તિ-
રુક્તે ઉભે હ્યજ્ઞધિયોઽનુવૃત્યા ।
દેહી ભવેન્નૈવ હિ કોઽપિ મુક્તો
ભવેદ્ધિ મુક્તિઃ સકલૈકરૂપા ॥ ૬૪૮॥

પ્રારબ્ધશક્તિર્ભવિતા હિ દેહે
નાત્મસ્વરૂપેઽસ્તિ તુ શક્તિરસ્ય ।
તસ્મૈ સ્વદેહો વિદુષાઽર્પિતો યત્
કથં નુ બાધ્યેત સ તેન બુદ્ધઃ ॥ ૬૪૯॥

પ્રારબ્ધકર્માર્પિત દેહકોઽસૌ
બુદ્ધોઽસ્તિ દેહે મમતા વિનૈવ ।
એવં સ્ફુટં શઙ્કરદેશિકેન
દિષ્ટં મનીષાભિધપઞ્ચકેઽસ્તિ ॥ ૬૫૦॥

સૂક્ષ્મં શરીરં વિદુષોઽસ્તિ શિષ્ટ-
મિત્યુચ્યતે ચેદિહ કારણાખ્યમ્ ।
અજ્ઞાનરૂપં નિધનં ગતં યત્
સૂક્ષ્મેણ સઙ્ગો વિદુષઃ કથં સ્યાત્ ॥ ૬૫૧॥

બ્રહ્માસ્ત્યસઙ્ગં હિ તથૈવ બુદ્ધો
ભવત્યસઙ્ગો હિ ભવે યથા ખમ્ ।
વપુર્વિકારા ઉત માનસાશ્ચ
બુદ્ધં કથઞ્ચિન્ન હિ સંસ્પૃશન્તિ ॥ ૬૫૨॥

જાગર્તિ યો નૈજપદે પ્રબુદ્ધો
યાને સુષુપ્તસ્ય સમઃ સ ઉક્તઃ ।
યાનસ્ય તુલ્યં ગદિતં શરીરં
તુરઙ્ગવચ્ચાપિ દશેન્દ્રિયાણિ ॥ ૬૫૩ ॥

ગતિં સ્થિતિં વાજિવિયોજનં ચ
યાનસ્ય નો વેત્તિ હિ તત્ર સુપ્તઃ ।
એવં સુષુપ્તશ્ચ શરીરયાને
ન વેત્તિ બુદ્ધો હિ શરીરભાવાન્ ॥ ૬૫૪॥

બુદ્ધસ્તુ તિષ્ઠન્ સહજે સમાધૌ

કર્માણિ કુર્વન્નિવ લક્ષ્યતેઽજ્ઞૈઃ ।
નાનાઽપ્યવસ્થા ભજતીવ ભાતિ
તા વીક્ષ્ય મુહ્યન્ત્યવિવેકિનસ્તુ ॥ ૬૫૫॥

સુપ્તિઃ સમાધિશ્ચ શરીરચેષ્ટા
ઇતિ ત્રિધા ભાન્તિ હિ તસ્ય ભાવાઃ ।
એનાંશ્ચ ભિન્ના ઇતિ મન્યતેઽજ્ઞો
વિલોક્ય બુદ્ધસ્ય શરીરમાત્રમ્ ॥ ૬૫૬॥

સદૈકધૈવાસ્તિ તુ સમ્પ્રબુદ્ધ-
સ્તસ્ય સ્થિતિર્નિત્યસમાધિરેવ ।
ન કર્મભિસ્તસ્ય વિરોધલેશો
ન કર્મણાં તેન વિરોધલેશઃ ॥ ૬૫૭॥

દ્વે નિર્વિકલ્પે હિ સમાધિનિષ્ઠે
સ્યાત્ કેવલૈકા સહજાભિદ્યાઽન્યા ।
ન કેવલાં પ્રાપ્ય ભવેત્ પ્રબુદ્ધઃ
સ એવ બુદ્ધઃ સહજસ્થિતો યઃ ॥ ૬૫૮॥

યઃ કેવલો નામ સમાધિરુક્તઃ
સ યોગિનઃ સ્યાન્મનસો લયેન ।
સમાધિરુત્થાનમિતિ પ્રસિદ્ધે
સ્થિતી વિભિન્ને ભવતોઽસ્ય લોકે ॥ ૬૫૯॥

મનઃ સમાધૌ બત યોગિનોઽસ્ય
સવાસનં હ્યેવ ભવેદ્વિલીનમ્ ।
સ્થિત્વા સમાધૌ સુચિરં ચ સોઽયં
વ્યુત્થાપ્યતે વાસનયા ભવાય ॥ ૬૬૦॥

યદા સમાધેરયમુત્થિતઃ સ્યાત્
પૂર્વોજ્ઝિતાં સંસૃતિમાદદાતિ ।
સમ્મોહનદ્રવ્યવિનષ્ટબોધઃ
કર્માસમાપ્તં પ્રતિબુધ્ય યદ્વત્ ॥ ૬૬૧॥

સંસારમેવં પ્રતિપદ્ય યોગી
ભૂયઃ સમાધિં પ્રવિશેત્ પ્રયત્નાત્ ।
બુદ્ધસ્ત્વયત્નઃ સહજસ્થિતત્વા-
ન્ન તં વિમુઞ્ચત્યપિ નાદદાતિ ॥ ૬૬૨॥

ન સંસૃતિં યાતિ કદાઽપિ બુદ્ધઃ

સમાધિરેવ પ્રકૃતિર્હિ તસ્ય ।
વિના સમાધિં સ કદાઽપિ નાસ્તી-
ત્યતઃ સમાધિઃ સહજાભિધોઽયમ્ ॥ ૬૬૩ ॥

અપ્રચ્યુતોઽસૌ નિજસત્યભાવાત્
સ્થિતઃ સદા સ્વે સહજે સમાધૌ ।
જીવન્ વિમુક્તો વ્યવહર્તુમીષ્ટે
લોકે યથા શઙ્કરદેશિકાદ્યાઃ ॥ ૬૬૪॥

યોગી યદા કેવલભાવમગ્ન-
સ્તદા ન શક્નોતિ હિ કર્મ કર્તુમ્ ।
યદોત્થિતોઽસૌ ભવિતા સમાધેઃ
કરોતિ કર્માજ્ઞતયા તદાનીમ્ ॥ ૬૬૫॥

તત્ત્વોપદેશેઽપિ મુમુક્ષુપુંસાં
ભવેત્ સમર્થો ન સ યોગિમર્ત્યઃ ।
તિષ્ઠાન્ સદૈવાચ્યુત એવ તુર્યે
શાસ્તા સમર્થોઽસ્તિ તુ બુદ્ધ એવ ॥ ૬૬૬॥

નાઙ્ગીકૃતાઽસૌ સહજા સ્થિતિશ્ચેદ્
ગીતાદિશાસ્ત્રાણિ મૃષેતિ સિદ્ધ્યેત્ ।
બુદ્ધોપદેશૈર્ભરિતત્વહેતોઃ
શાસ્ત્રં પ્રમાણં હિ મુમુક્ષુપુંસામ્ ॥ ૬૬૭॥

પરમ્પરાઽસૌ ખલુ બુદ્ધપુંસાં
મુમુક્ષુલોકોદ્ધરણાર્થમેવ ।
રક્ષત્યવિચ્છિન્નતયા સદૈવ
સુજ્ઞાનશાસ્ત્રસ્ય સુસમ્પ્રદાયમ્ ॥ ૬૬૮॥

અન્ત્યં પ્રમાણં હિ નિજાનુભૂતિ-
ર્ન સંશયાનામુદયોઽસ્તિ યત્ર ।
તાવત્ પ્રમાણાનિ હિ બુદ્ધવાચો
લભ્યેત યાવન્ન તથાનુભૂતિઃ ॥ ૬૬૯॥

ગત્વાઽમ્બુધિં તન્મયતાં ગતાયા
નદ્યાઃ સમો બુદ્ધ ઉદીરિતોઽસ્તિ ।
કૂપે નિમગ્નસ્ય ઘટસ્ય તુલ્યો
રજ્જ્વા નિબદ્ધસ્ય તુ કેવલસ્થઃ ॥ ૬૭૦॥

ઘટઃ સરજ્જુર્હિ વિકૃષ્યમાણો

રજ્જ્વા બહિર્યાતિ પુનશ્ચ કૂપાત્ ।
એવં મનઃ કેવલભાવમગ્નં
વિકૃષ્યતે વાસનયા ભવાય ॥ ૬૭૧॥

નૈષ્કર્મ્યમેવં સહજસ્થિતસ્ય
સ્ફુટીકૃતં નો ભગવત્તમેન ।
વિદ્વાનકર્તાઽપિ ભવન્ સ્વભાવાત્
કર્તા મહાંશ્ચાપિ ભવત્યસઙ્ગઃ ॥ ૬૭૨॥

સત્સઙ્ગતિર્નામ નિગદ્યતે યા
બુદ્ધસ્ય પુંસઃ ખલુ સઙ્ગતિઃ સા ।
અર્થો ભવેદ્ બ્રહ્મ હિ સત્પદસ્ય
તદાત્મકોઽસૌ ભવિતા હિ બુદ્ધઃ ॥ ૬૭૩ ॥

બ્રહ્મૈવ સર્વોઽપિ હિ કો વિશેષઃ
પ્રબુદ્ધપુંસીતિ ન શઙ્કનીયમ્ ।
અહન્તયાઽન્યત્ર હૃતપ્રભં સત્
પૂર્ણપ્રભં તત્તુ વિભાતિ બુદ્ધે ॥ ૬૭૪॥

સઙ્ગં પ્રબુદ્ધસ્ય ભજન્ મુમુક્ષુઃ
સઙ્ગાત્ સમસ્તાદપિ મુક્તિમેતિ ।
નિસ્સઙ્ગભાવેન નિરસ્તમોહો
યાત્યેકતાં નિશ્ચલચિત્સ્વરૂપે ॥ ૬૭૫॥

સત્સઙ્ગસઞ્જાતનિજસ્વરૂપા-
ન્વેષેણ લભ્યં પરમં પદં યત્ ।
શાસ્ત્રાર્થબોધાચ્છ્રવણાદિભિર્વા
સાધ્યં ન તન્નેતરસાધનૈર્વા ॥ ૬૭૬॥

સત્સઙ્ગતિં ચેદ્ ભજતે મુમુક્ષુ-
શ્ચરેત્ કિમર્થં નિયમાન્ યથાઽન્યે ।
શીતો વહેદ્ દક્ષિણમારુતશ્ચેત્
કિમર્થમિચ્છેદ્ વ્યજનં તદાનીમ્ ॥ ૬૭૭॥

તાપં શશી કલ્પતરુશ્ચ દૈન્યં
હરેચ્ચ ગઙ્ગા બત પાપમાત્રમ્ ।
વીક્ષા સતાં નાશયતિ ત્રયં ચ
ન તત્સમં કિઞ્ચન વિદ્યતેઽન્યત્ ॥ ૬૭૮॥

સમાનિ સદ્ભિર્ન જલાત્મકાનિ

तीर्थानि देवाश्च मृदादिमात्राः ।
पुनन्ति तानि ह्यतिदीर्घकालात्
सन्दर्शनादेव पुनन्ति बुद्धाः ॥ ६७९॥

गङ्गाम्भसि स्नानफलं विनाशः
पापस्य पुंसो न तु पापकर्तुः ।
सङ्गात् सतां नश्यति पापकर्ता
न तत्समं पावनमस्ति लोके ॥ ६८०॥

मृत्युञ्जयोऽसौ त्रिपुरान्तकोऽसौ
स्मरान्तकोऽसौ नरकान्तकश्च ।
स हीश्वराणामपि चात्मभूत-
स्तमेव सर्वेऽपि हि पूजयन्ति ॥ ६८१॥

नीतं यदन्तं वपुषां त्रयं च
ज्ञानेन तेन त्रिपुरान्तकोऽसौ ।
नीतोऽहमाख्यो निधनं च तेने-
त्यतः स बुद्धो नरकान्तकश्च ॥ ६८२॥

अहं स्वयं बुद्ध इति ब्रवीति
गीतासु कृष्णो भगवान् स्वयं यत् ।
न कोऽपि तस्यास्ति समोऽधिको वा
न मीयते तन्महिमा कथञ्चित् ॥ ६८३॥

यतः प्रबुद्धः पर एव साक्षात्
तस्योपदेशाः परमं प्रमाणम् ।
ततः परं तस्य वचोभिरेव
प्रामाण्यमस्ति श्रुतिशीर्षवाचाम् ॥ ६८४॥

परात्मशक्तेः करुणाभिधाया
रूपं द्वितीयं हि गुरुः प्रबुद्धः ।
अतः सुभक्त्या स्वगुरुं प्रबुद्धं
भजन् मुमुक्षुर्भविता कृतार्थः ॥ ६८५॥

शक्तिः शुभा काचन सन्निधाने
बुद्धस्य पुंसोऽस्ति सुदूरतश्च ।
त्यजेत नो कोऽपि तया गृहीतः
परं तु नीयेत विमुक्तिमेव ॥ ६८६॥

व्याघ्रेण यद्वद्धरिणो गृहीतो

તદજ્ઞતામેતિ તથૈવ સાધુઃ ।
ધ્રુવં પ્રબુદ્ધેન દૃશા ગૃહીત-
સ્તદ્ભાવમેતીતિ ગુરુર્જગાદ ॥ ૬૮૭॥

બહિઃ સ્થિતોઽન્તર્મુખતાં વિધાયા-
પ્યન્તઃ સ્થિતોઽન્તશ્ચ વિકૃષ્ય ચિત્તમ્ ।
પરે પદે સ્વે વિદધાતિ નિષ્ઠાં
સાધોઃ પ્રબુદ્ધો હિ ગુરુઃ સ્વશક્ત્યા ॥ ૬૮૮॥

અગોચરોઽસૌ વચસો ધિયોઽપિ
નિષ્ઠા હિ બુદ્ધસ્ય પદે પરસ્મિન્ ।
બોધાય સાધોસ્તુ યથાકથઞ્ચિત્
કિઞ્ચિત્ પ્રબુદ્ધૈરિદમુક્તમસ્તિ ॥ ૬૮૯॥

વ્યાખ્યાત એવં સહજાત્મભાવઃ
સસાધનોઽસૌ ગુરુણોપદિષ્ટઃ ।
અથોપદેશેષ્વિહ સાર એષ
નિરુચ્યતે સાધ્વવધારણાય ॥ ૬૯૦॥

વિશ્વં સ્વદૃશ્યં ચ તદીક્ષકં સ્વં
જાનાતિ લોકે સકલોઽપિ જન્તુઃ ।
સ્વતશ્ચ સત્યં દ્વયમપ્યવૈતિ
મોહસ્ત્વયં સંસૃતિહેતુરસ્ય ॥ ૬૯૧॥

સત્યં સ્વતશ્ચેદુભયં તદેતત્
ભાયાદ્વિચ્છિન્નતયા સદૈવ ।
કદાઽપિ ભાતં ચ કદાપ્યભાતં
ભવેત્ તુ યત્ તત્ કથમસ્તુ સત્યમ્ ॥ ૬૯૨॥

પ્રકાશતે માનસચેષ્ટયૈવ
સ્વપ્નેઽપિ જાગ્રત્યુભયં તદેતત્ ।
ભાતિ દ્વયં નૈવ સુષુપ્તિભાવે
તતો મનોમાત્રમિદં દ્વયં ચ ॥ ૬૯૩॥

યસ્મિન્ મનો યાતિ લયં ચ યસ્મા-
દુદેતિ ભૂયોઽપિ તદેવ સત્યમ્ ।
લયોદયાભ્યાં રહિતં તદેતત્
સત્યં સ્વતો મુક્તિપદં મુમુક્ષોઃ ॥ ૬૯૪॥

સત્તાપ્રદં તજ્જગતોઽખિલસ્ય

ब्रह्माभिधानं परिपूर्णमेकम् ।
ચૈતન્યદીપ્તિં મનસે તદેવ
દદાતિ ચૈતન્યવિવર્જિતાય ॥ ૬૯૫॥

અન્તર્હૃદિ સ્વાત્મતયા તદેવ
સાક્ષીવ નિશ્ચિન્તનમસ્ત્યસઙ્ગમ્ ।
આચ્છાદ્યતે તત્તુ બહિર્મુખત્વે
મૃષાપ્રપઞ્ચેન મનોમયેન ॥ ૬૯૬॥

અતો ન તં કશ્ચન વેત્તિ લોકે
પશ્યન્નિદં સત્યવદેવ મોહાત્ ।
શરીરમેવાત્મતયાઽપિ મત્વા
ભ્રામ્યત્યસઙ્ખ્યેષુ ભવેષુ દુઃખી ॥ ૬૯૭॥

તેનાત્મરૂપેણ પરેણ વિશ્વ-
માચ્છાદનીયં તુ મનોવિનાશાત્ ।
ભાયાત્ તદૈવ પ્રતિબન્ધહીનં
હ્યાત્મસ્વરૂપં વિમલં યથાવત્ ॥ ૬૯૮॥

વિવેકવૈરાગ્યયુતો વિમુક્ત્યૈ
ગુરૂક્તમાર્ગેણ યદા યતેત ।
મૂલે નિજે બ્રહ્મણિ જન્મ લબ્ધ્વા
વિમુચ્યતેઽસૌ ભવબન્ધપાશૈઃ ॥ ૬૯૯॥

કૃત્વા મનોઽન્તર્મુખમસ્તચિન્તં
નિમજ્ય ચાન્તર્નિજમાર્ગણેન ।
મનોવિનાશેન વિનષ્ટમોહો
ભવેદ્વિમુક્તઃ સ નરઃ પ્રબુદ્ધઃ ॥ ૭૦૦॥

પરાત્પરં યત્ સકલાત્મભૂત-
મસ્મદ્ગુરુઃ શ્રીરમણો બભૂવ ।
યાવદ્ ભવિષ્યત્યહમો વિનાશઃ
સહસ્રશઃ સન્તુ નમાંસિ તસ્મૈ ॥ ૭૦૧॥

॥ ૐ નમો ભગવતે શ્રીરમણાય ॥

Encoded and proofread by Sunder Hattangadi
sunderh at hotmail.com

Text composed by Shri LakShmanasharmana.

This work is published by Sri Ramanasramam
www.sriramanamaharshi.org
It has been approved to be posted
on sanskritdocuments.org by permission of
Sri V.S. Ramanan, President, Sri Ramanasramam.

.. Shri Ramanaparavidyopanishad ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com